केरलपाठावलिः

# संस्कृतम्

## दशमी कक्ष्या

अकादमिक-संस्कृतविद्यालयानां कृते ।

KERALA READER

# SANSKRIT

STANDARD

# X

FOR ACADEMIC AND SANSKRIT SCHOOLS

Government of Kerala
Department of General Education

2025
State Council of Educational Research and Training (SCERT), Kerala

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारतभाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड़ उत्कल बंगा।
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधितरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जय-गाथा।
जनगणमंगलदायक जय हे,
भारतभाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे।

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**Prepared by**
State Council of Educational Research and Training (SCERT)
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
First Edition: 2025
Printed at : KBPS, Kakkanad, Kochi-30
Department of General Education, Government of Kerala

प्रियच्छात्राः !

दशमकक्ष्यायाः संस्कृतपाठ्यपुस्तकं भवतां पुरतः प्रस्तूयते। कविता, कथा, विवरणम्, उपन्यासः सम्भाषणम् इत्यादिभिः व्यवहाररूपैः समाकलितं भवतीदं पाठ्यपुस्तकम् ।

सूचना - प्रौद्योगिक-उपाधयः (ICT) राष्ट्रिय-कौशल-योग्यता-प्रारूपम् (NSQF) नूतनानि पठनतन्त्राणि च पुस्तकेऽस्मिन् परिगणितानि सन्ति। माध्यमिकशिक्षायाः समाप्तिः दशमकक्ष्यायामेव इत्यतः अनुस्यूतपठनाय प्रेरणादायकाः अंशाः अपि अत्र अन्तर्भाविताः।

स्वतन्त्रवाचनाय स्वतन्त्रचिन्तायै शास्त्रावबोधाय विशकलनात्मकचिन्तायै सर्गवैभवाय च अवसराः पुस्तकेऽस्मिन् समाकलिताः । भाषायाः प्रयोगोपाधिमधिगन्तुं तद्वारा रचनाप्रवर्तनेषु भागं ग्रहीतुं च पठनानुभवाः कक्ष्याप्रकोष्ठात् अवाप्तव्याः ।

पुस्तकस्यास्य अध्ययनेन संस्कृतभाषायाः विशालं लोकं प्रवेष्टुं प्रेरणा नूनं भविष्यति इति आशासे।

भवदीयः

डाः जयप्रकाश् आर्. के

निदेशकः

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम्

## TEXTBOOK DEVELOPMENT COMMITTEE
## SANSKRIT X- ACADEMIC

### Advisor

**V. Madhavan Pillai** , Associate Professor in Sanskrit ( Rtd).

### Chairperson

**Ramachandran. N K**, DEO( Rtd), Wayanad.

### Experts

**Dr. Renil Dev M R,** Assistant Professor in Sanskrit,Department of Vyakarana, Govt. Sanskrit Collage, Trivandrum,

**Dr. Shihab N A**, Assistant Professor in Sanskrit,Department of Sanskrit, University of Calicut.

### Participants

**Dr.Hariprasad. V. T,** HST (Skt), GHSS Thiruvangad,Thalassery, Kannur.

**Jees Verghese P D,** HST (Skt), St.Joseph's HSS Velupadom,Thrissur.

**Parameswaran .H,** HST (Skt), GVHSS Kanhangad, Kasargod.

**Ramesh Babu.R,** HST (Skt), National HS,Vallamkulam,Pathanamthitta.

**Dr. Sabarees.M,** HST (Skt), H S S Mundur, Palakkad.

**Sreekumar. C.R,** HST (Skt), Ramavilasam HSS, Chokli, Thalassery, Kannur.

**Sreekumar. S,** HST (Skt), PPMHS,Karakonam, Trivandrum.

**Vinodini.T,** HST (Skt),G V H S S Valapad, Thrissur.

### Artist

Pramod Kumar K K (Pramod Chithram), Pattiam, Kannur.

### ACADEMIC CO-ORDINATOR

**Deepa N Kumar**

Research Officer(I/C Sanskrit) SCERT, Kerala.

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलम् ।
STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| १ सौरभ्यम् | १ | वनराजिसम्पदः | कविता | ८ |
| | २ | क्षितिरार्द्रा भवेत्सदा | कथा | १५ |
| | ३ | केरलारामः | विवरणम् | २३ |
| २ लावण्यम् | ४ | काव्यदीपशिखा | काव्यम् | ३३ |
| | ५ | सञ्जय उवाच | जीवनचरितम् | ४३ |
| ३ नैर्मल्यम् | ६ | भुवि पूर्वं न दृश्यते | रूपकम् | ५१ |
| | ७ | तेय्यम् - मनोरञ्जकम् | उपन्यासः | ६२ |
| ४ मार्दवम् | ८ | कुरु सिंहावलोकनम् | आख्यानम् | ७१ |
| | ९ | द्रष्टव्यं शास्त्रचक्षुषा | सुभाषितम् | ७७ |
| | १० | शिक्षानुशासनम् | सम्भाषणम् | ८६ |


## पठनप्रवर्तनानां सूचकानि ।


लेखनम्


लेखनम्


आलपनम्


चर्चा


संयोजनम्


चलनचित्रम्


संवादः


चित्रीकरणम्


सम्भाषणम्


प्रभाषणम्


नाटकम्

# ഭാരതത്തിന്റെ ഭരണഘടന

## ആമുഖം

**ഭാരതത്തിലെ ജനങ്ങളായ നാം** ഭാരതത്തെ ഒരു [1][**പരമാധികാര സ്ഥിതിസമത്വ മതേതര ജനാധിപത്യ റിപ്പബ്ലിക്കായി**] സംവിധാനം ചെയ്യുവാനും അതിലെ പൗരന്മാർക്കെല്ലാം:

സാമൂഹ്യവും സാമ്പത്തികവും രാഷ്ട്രീയവും ആയ **നീതിയും;**

ചിന്തയ്ക്കും ആശയപ്രകടനത്തിനും വിശ്വാസത്തിനും മതനിഷ്ഠയ്ക്കും ആരാധനയ്ക്കും ഉള്ള **സ്വാതന്ത്ര്യവും;**

പദവിയിലും അവസരത്തിലും **സമത്വവും;** സംപ്രാപ്തമാക്കുവാനും;

അവർക്കെല്ലാമിടയിൽ

വ്യക്തിയുടെ അന്തസ്സും [2][രാഷ്ട്രത്തിന്റെ ഐക്യവും അഖണ്ഡതയും] ഉറപ്പുവരുത്തിക്കൊണ്ട് **സാഹോദര്യം** പുലർത്തുവാനും;

സഗൗരവം തീരുമാനിച്ചിരിക്കയാൽ;

**നമ്മുടെ ഭരണഘടനാ നിർമ്മാണസഭയിൽ** ഈ 1949 നവംബർ ഇരുപത്താറാം ദിവസം **ഇതിനാൽ ഈ ഭരണഘടനയെ സ്വീകരിക്കുകയും നിയമമാക്കുകയും നമുക്കു തന്നെ പ്രദാനം ചെയ്യുകയും ചെയ്യുന്നു.**

---

1. 1976 - ലെ ഭരണഘടന (നാല്പത്തിരണ്ടാം ഭേദഗതി) ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "പരമാധികാര ജനാധിപത്യ റിപ്പബ്ലിക്" എന്നതിന് പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).
2. മേല്പറഞ്ഞ ആക്റ്റ് 2-ാം വകുപ്പു പ്രകാരം "രാഷ്ട്രത്തിന്റെ ഐക്യം" എന്നതിനു പകരം ചേർത്തത് (3.1.1977 മുതൽ പ്രാബല്യം).

# एककम् १

# सौरभ्यम्

## आमुखम्

दशमकक्ष्यापाठ्यपुस्तकस्य प्रथममेककं भवति सौरभ्यम् । नवमकक्ष्यायां पल्लवं पलाशं कुड्मलं प्रसूनम् इति भवन्ति एककानां नामानि । अत्र तु प्रसूनस्य सौरभ्यादयः गुणाः एककनामत्वेन परिकल्प्यन्ते । अस्यां वसुधायां जीवसन्धारणाय सर्वेषां प्राणिनाम् अधिकारोऽस्ति । तदर्थं जलं प्राणवायुश्च अत्यन्तापेक्षितं भवति । तरुलतादीनां संवर्धनेन प्राणवायोः लाभः निरर्गलः स्यात् । पेयजलस्य लाभाय वृष्टिजलमपेक्षते । वृष्टेरभावे नदीतटाकादिभ्यः कुल्याद्वारा जलमानीय पानार्थं कृषेरावश्यकार्थं च उपयोक्तुं शक्यते । एवम् अस्माकमेव कर्मकुशलतया वसुन्धरामिमां सस्यश्यामलकोमलां कर्तुं शक्यते । अस्मिन्नेकके त्रयः पाठाः सन्ति । **वनराजिसम्पदः** इति कविता, **क्षितिरार्द्रा भवेत्सदा** इति कथा, **केरलारामः** इति उपन्यासश्च । एते पाठाः कुसुमस्य सौरभ्यवत् एककनाम सार्थकं कुर्वन्ति ।

# प्रथमः पाठः

# वनराजिसम्पदः।



## पाठप्रवेशः

वन्यजीविवाराचरणं कदा भवति? तस्मिन् समये भवन्तः किं किं कुर्वन्ति ? प्रतिवर्षं कति वृक्षान् वयं रोपयामः? एतादृशस्य वृक्षरोपणस्य आवश्यकता का? सस्यानां पोषणं पालनं च अस्माकं कर्तव्यम् इति जानीमः खलु। सर्वजीविनां सुस्थितये सस्यानि अत्यन्तापेक्षितानि भवन्ति । सस्यसम्पन्नं काननं तु प्रकृतेः अविभाज्यभागोऽस्ति । कस्यचित् वनस्य वाङ्मयचित्रं पश्यामः।

## आमुखम्

प्रकृतिरियं सर्वगुणसम्पन्ना तथा सर्वेषां प्राणिनां समस्तसौभाग्यदायिनी च भवति । तथापि रौद्रमृदुलभावाभ्यां सा सदा अधृष्या अभिगम्या चास्ति। अस्याः विरुद्धमिदं स्वरूपं द्रष्टुं काननमेव गन्तव्यम्। तत्र तमःप्रकाशयोः मिश्रणं तथा मृदुलविह्वलाः रवाः, निम्नोन्नताः भूविभागाः, ह्रस्वोन्नताः वृक्षाः इत्यादीनां वैरुध्यानां मेलनञ्च एकत्रैव द्रष्टुं शक्यते । तद्विषये कवितामेकां पठामः।





घनघोरसुन्दरं बन्धुरं काननं
खगमृगादीनां तु सुखनिशान्तम्।
नवपल्लवाढ्यं च कुसुमसम्पन्नकं
परितो महीधरं भोः! चकास्ति॥

वननिर्झरी दरी भ्रमरीभिराकुलात्
मुखरीकृतं चारु सरसीतटम्।
तरुलताशाखासु नीडजानां तथा
शाखामृगानां च सुखमेलनम्॥

तरुकोटरान्तरे शुककुलानां, बिले
नकुलस्य शशकस्य विविधस्वनम्।
नवलताकुञ्जेषु नित्यं वनप्रियैः
कृतमहो! सङ्गीतरससेचनम्॥

वनशिलातलमेत्य तारापथं वीक्ष्य
मृगकुलाधीशस्य घनगर्जनम्।
बर्हिणां नर्तनं नवमेघवर्षणं
वनतलं सर्वत्र घोषपूर्णम्॥

प्रकृतिस्तु मोहनाकारेण भीषणे-
नानन्त्यरूपेण वर्ततेऽत्र।
वनराजिसम्पदः प्राणिनामिव मर्त्य-
लोकस्य सर्वथा हितकराः स्युः॥



## पदच्छेदः

| | | |
|---|---|---|
| परितो महीधरम् | - | परितः + महीधरम्। |
| भ्रमरीभिराकुलात् | - | भ्रमरीभिः + आकुलात्। |
| प्रकृतिस्तु | - | प्रकृतिः + तु। |
| भीषणेनानन्त्यरूपेण | - | भीषणेन + आनन्त्यरूपेण। |
| वर्ततेऽत्र | - | वर्तते + अत्र। |

## विग्रहः

| | | |
|---|---|---|
| घनघोरसुन्दरम् | - | घनं च घोरं च सुन्दरं च। |
| खगमृगादीनाम् | - | खगाः च मृगाः च खगमृगाः। ते आदयः। तेषाम्। |
| सुखनिशान्तम् | - | सुखं च तत् निशान्तं च। |
| नवपल्लवाढ्यम् | - | नवं च तत् पल्लवं च, तैः आढ्यम्। |
| कुसुमसम्पन्नकम् | - | कुसुमैः सम्पन्नं कुसुमसम्पन्नम्,<br>तदेव कुसुमसम्पन्नकम्। |
| वननिर्झरी | - | वनात् आगता निर्झरी। |
| सरसीतटम् | - | सरस्याः तटम्। |
| तरुलताशाखासु | - | तरवः च लताः च तरुलताः, तासां शाखा, तासु। |
| तरुकोटरान्तरे | - | तरूणां कोटराः तरुकोटराः, तेषाम् अन्तरे। |
| मृगकुलाधीशस्य | - | मृगानां कुलं मृगकुलम्,तस्य अधीशः<br>मृगकुलाधीशः , तस्य। |
| घनगर्जनम् | - | घनं च तत् गर्जनं च। |
| वनराजिसम्पदः | - | वनानां राजिः वनराजिः, सा एव सम्पत् ताः। |

## कोशः

| | | |
|---|---|---|
| काननम् | - | अटव्यरण्यं विपिनं गहनं काननं  वनम् । |
| निशान्तम् | - | निशान्तवस्त्यसदनं भवनागारमन्दिरम् । |
| महीधरः | - | महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः। अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः।। |
| शाखामृगः | - | कपिप्लवंगप्लवगशाखामृगवलीमुखाः मर्कटो वानरःकीशो । |
| दरी | - | दरी तु कन्दरो वा स्त्री देवखातबिले गुहा । |
| वनप्रियः | - | वनप्रियः परभृतः कोकिलः पिकः इत्यपि । |
| बर्हीं | - | मयूरो बर्हिणो बर्हीं नीलकण्ठो भुजङ्गभुक् । शिखावलः शिखी केकी मेघनादानुलास्यपि । |

## पठनप्रवर्तनानि



### बालकवितांताललयानुसारम् आलपतु ।

**श्रद्धेयाः अंशाः**

उचिततालेन आलपनीयम् ।
कवितायाः आशयं ज्ञात्वा भावानुसारम् आलपनीयम् ।
पदानाम् उच्चारणं स्फुटतया करणीयम् ।



### कवितां पठित्वा आशयं लिखतु ।

**श्रद्धेयाः अंशाः**

सम्पूर्णमाशयं ज्ञात्वा लेखनीयम् ।
भाषाप्रयोगे उचितवाक्यघटना स्वीकरणीया ।
उपन्यासस्य शैली अनुवर्तनीया ।

## आशयानुसारं कवितापङ्क्तिं चित्वा लिखतु ।

**आशयः**

**क)** पर्वतं परितः वनानि सन्ति ।

**ख)** कोकिलाः वल्लीनिकुञ्जेषु मधुरं गायन्ति ।

**ग)** आकाशं वीक्ष्य सिंहः उच्चैः गर्जति ।

**घ)** वनसम्पदः सर्वेषां प्राणिनाम् अत्यन्तमुपकारप्रदाः भवन्ति ।

**ङ)** सस्यानां शाखासु खगाः वानराः च सम्मिलन्ति ।

**श्रद्धेयौ अंशौ**

दत्तस्य आशयस्य समुचिता पङ्क्तिः स्वीकरणीया ।
कवितापङ्क्तिः पूर्णतया लेखनीया ।

## प्रयोगविशेषं ज्ञात्वा उदाहरणानुसारं वाक्यानि लिखतु ।

**उदा - अध्यापकस्य** परितः छात्राः तिष्ठन्ति ।

**अध्यापकं परितः** छात्राः तिष्ठन्ति ।

**क)** वृक्षस्य परितः तृणानि रुहन्ति ।

**ख)** सूर्यस्य परितः प्रभावलयं चकास्ति ।

**ग)** पर्वतस्य परितः वनानि सन्ति ।

**घ)** गजस्य परितः जनाः तिष्ठन्ति ।

**श्रद्धेयौ अंशौ**

आशयावबोधः।

उचितविभक्तिप्रयोगः।

## वनसंरक्षणम् इति विषये चर्चां चालयतु टिप्पणीं च लिखतु ।

**श्रद्धेयाः अंशाः**

चर्चायां सर्वे भागभाजः भवन्तु ।

चर्चासूचकाः स्वीकरणीयाः ।

आशयस्य क्रमानुगतम् अवतरणम् ।

चर्चायाः क्रोडीकरणम् ।



**पाठस्य आशयं स्वीकृत्य लघुचित्रनिर्माणं करोतु । (ऐ.सि.टि)**

**श्रद्धेयाः अंशाः**

पाठभागस्य आशयं स्वांशीकृत्य चित्रं निर्मातव्यम् ।

चित्राणि विवरणात्मकानि स्युः।

भावनानुसारं चित्राणि करणीयानि ।



**समानाशययुक्तानां कवितानां समाहरणं करोतु ।**

**श्रद्धेयौ अंशौ**

कवितायाः आशयः सम्यक् अवगन्तव्यः ।

आशयानुसारं कविताः चयनीयाः।

## क्रियापदपरिचयः

| | | | | |
|---|---|---|---|---|
| **चकास्ति** | - | चकासृ दीप्तौ | परस्मैपदी | लट् प्र.पु. ए.व। |
| | | चकास्ति - चकास्तः - चकासति । | | |
| **स्युः** | - | अस भुवि | परस्मैपदी | वि. लिङ् प्र.पु. ब.व। |
| | | स्यात् - स्याताम् - स्युः । | | |
| **वर्तते** | - | वृतु वर्तने | आत्मनेपदी | लट् प्र.पु.ए.व । |
| | | वर्तते - वर्तेते - वर्तन्ते । | | |

## अधिकवाचनांशः

**अन्वयः**

**घनघोरसुन्दरं ........... चकास्ति ।।**

घनघोरसुन्दरं बन्धुरं खगमृगादीनां तु सुखनिशान्तं नवपल्लवाढ्यं कुसुमसम्पन्नकं च काननं महीधरं परितः भोः चकास्ति ।

**वननिर्झरी ........... सुखमेलनम् ॥**

वननिर्झरी, दरी, आकुलात् भ्रमरीभिः मुखरितं चारु सरसीतटम्, तथा तरुलताशाखासु नीडजानां शाखामृगानां च सुखमेलनम् अत्र दृश्यते।

**तरुकोटरान्तरे ........... सङ्गीतरसकल्पनम् ॥**

तरुकोटरान्तरे शुककुलानाम्, बिले नकुलस्य शशकस्य च विविधस्वनम्, नवलताकुञ्जेषु वनप्रियैः नित्यं कृतं सङ्गीतरससेचनं च वर्तते।

**वनशिलातलमेत्य ........... घोषपूर्णम् ॥**

वनशिलातलम् एत्य तारापथं वीक्ष्य मृगकुलाधीशस्य घनगर्जनं, बर्हिणां नर्तनं, नवमेघवर्षणं, च अत्र भवन्ति। एवं वनतलं सर्वत्र घोषपूर्णं भवति।

**प्रकृतिस्तु ........... हितकराः स्युः॥**

प्रकृतिः तु मोहनाकारेण भीषणेन आनन्त्यरूपेण अत्र वर्तते। एताः वनराजिसम्पदः प्राणिनाम् इव मर्त्यलोकस्यापि सर्वथा हितकराः स्युः।

## ल्यबन्तरूपाणि

**एत्य** - आङ् उपसर्गपूर्वकस्य इण् गतौ धातोः रूपम्। ( क्त्वान्तम्- इत्वा )

**वीक्ष्य** - वि उपसर्गपूर्वकस्य ईक्ष्-दर्शने धातोः रूपम्। ( क्त्वान्तम् - ईक्षित्वा )

भवतां विद्यालये जैववैविध्यारामे कानि कानि जीवजालानि भवन्ति? तेषां परिपालनाय किं करणीयम्? वातावरणस्य परिणामः तानि कथं बाधते ? चर्चां नयतु ।

# द्वितीयः पाठः

# क्षितिराद्रा भवेत् सदा

## पाठप्रवेशः

पूर्वस्मिन् पाठे वनसंरक्षणस्य प्राधान्यम् अस्माभिरवगतम्। वनपरिपालनम् अकृतं चेत् किं किं भविष्यति ? वायोः जलस्य च संरक्षणे वनं कथं सहायकं भवति इति भवन्तः चिन्तितवन्तः खलु ? वननाशनेन आगोलतापनम्, अनावृष्टिः इत्यादीनि सम्भवन्ति इति सर्वैः ज्ञातम् । अस्य क्लेशं न केवलं मानवाः अपि तु सर्वाणि जीवजालानि अनुभवन्ति। तादृशीम् एकां कथां पठामः।

## आमुखम्

अनावृष्ट्या पीडितानां प्राणिनाम् अवस्थाप्रतिपादिकाः बह्व्यः कथाः साहित्यलोके सन्ति । एतद्विषयिकाः कथाः कैरल्यामपि विद्यन्ते । वैलोप्पिल्लि श्रीधरमेनोन् महाशयेन विरचितायां “जलसेचनम्” इति कवितायामपि एष एव विषयः प्रतिपादितः वर्तते। तस्माद् आशयात् समाकलितोऽयं पाठभागः।



पुष्पफलसमृद्धैः तरुलतादिभिः सम्पन्नो भवति गोवर्धनाचलस्य सानुप्रदेशः। तत्रस्थाः जनाः पशुपालनं, कार्षिकवृत्तिं च कृत्वा जीवनमकुर्वन् । गच्छता कालेन अनावृष्ट्या ग्रीष्मातपेन च सोऽयं प्रदेशो मरुप्रदेशकल्पः संवृत्तः । सर्वाणि जीवजालानि जलाभावेन प्रचण्डातपेन च बहुधा क्लेशान् अन्वभवन् । दिनेषु गतेषु द्वारकातः आगतः बलभद्रः गोकुलवासिनाम् इमाम् अवस्थाम् अन्वपश्यत् । सर्वत्र उष्णवातेन धूलीकलापः प्रसरति । महातरूणां शाखापत्राणि सर्वत्र शुष्काण्यपतन् । उष्णातपेन पीडितानां वत्सानां सशोकम् अम्बारवमपि तस्य कर्णयोः न्यपतत् । एवं गोकुलानाम् एतां दुर्दशां निशम्य सीरपाणेः हृदयं नितरां व्याकुलमभवत् ।

दशामिमां निरीक्ष्य सूरजायाः तीरे स्थितं हलायुधम् उपेत्य केचन गोपालकाः एवमवदन् । "भो बलदेव ! अस्माकं प्रदेशोऽयं जलाभावेन ऊषरा भवति । अत्र जलमिति व्यवहर्त्तुम् इदानीमस्माकं नेत्राम्बुकणमेव शिष्टमस्ति । उन्नतवृक्षाः अपि चण्डांशुकिरणैः शुष्काः जाताः। तर्हि तृणानां कार्यं किमुत? "

एतदाकर्ण्य आश्रितवत्सलस्य हलधरस्य हृदयं कृपार्द्रम् अभवत् । चिन्तामग्नः स कालिन्दीतीरे निषसाद । तस्य मनसि वर्षकालाकाशे नवपयोद इव काचन चिन्ता



प्रादुरभूत् । जलसेचनात् ऋते गोकुलस्य दुरितपरिहरणाय अन्यः उपायः नास्ति । एवं विचिन्तयन् कालिन्दीम् अवदत् । "भोः कलिन्दजे ! अस्तशोभं गोकुलं किं न पश्यसि? हे भूलोकसेविनि! कारुण्यशालिनि! गोलोकवासिनां मुख्यपयस्विनि! त्वत्कारुण्यमेव तृणान्येतानि । तव प्रेम एव अत्र क्षीररूपेण प्रवहति । अतः पुनरपि तव कृपाम् अत्र सर्वत्र प्रसारयतु इति प्रार्थये ।"

हलायुधस्य मधुरोदाराम् इमां वाणीं श्रोतुं विमुखा इव सा स्रोतस्विनी स्वच्छन्दं प्रावहत् । तद् दृष्ट्वा बलभद्रः कोपान्धः अभवत् । सक्रोधं स अवदत् "सर्वेषु जन्तुषु जलाभावेन पीडितेषु सत्सु स्वकीयं शुद्धं जलं वृथा लवणाम्भसि निक्षिपसि किल ? तव गर्वमिदानीं हनिष्यामि" । एवमुक्त्वा सः हलेन बलात् कलिन्दजायाः तीरं विदार्य ततः गोवर्धनपर्यन्तं पयःप्रणालीम् अकरोत् । तेन मार्गेण यमुनाजलं कलकलारवैः सह प्रावहच्च । गोपास्तु जलप्रवाहेन उद्भूतं मृद्गन्धम् आघ्राय आनन्दनर्त्तनं कृत्वा एवं प्रार्थयन्तः ।

"सर्वेषां जीवजालानां सर्वसौभाग्यदायिनी ।
सर्वंसहेयं जननी क्षितिरार्द्रा भवेत्सदा ॥"

## पदच्छेदः

| | | |
|---|---|---|
| सम्पन्नो भवति | - | सम्पन्नः + भवति । |
| शुष्काण्यपतन् | - | शुष्काणि + अपतन् । |
| प्रदेशोऽयम् | - | प्रदेशः + अयम् । |
| एतदाकर्ण्य | - | एतत् + आकर्ण्य । |
| नास्ति | - | न + अस्ति । |
| नवपयोद इव | - | नवपयोदः + इव । |
| तृणान्येतानि | - | तृणानि + एतानि । |
| पुनरपि | - | पुनः + अपि । |
| स हलेन | - | सः + हलेन । |

## विग्रहः

| | | |
|---|---|---|
| मरुप्रदेशकल्पः | - | मरुश्च असौ प्रदेशः मरुप्रदेशः, ईषदूनः मरुप्रदेशः । |
| सशोकम् | - | शोकेन सह वर्तते। (यस्मिन् कर्मणि तद्यथा भवति तथा ।) |
| हलधरः | - | धरति इति धरः, हलस्य धरः । |
| हलायुधः | - | हलम् आयुधः यस्य सः । |
| दुर्दशा | - | दुष्टा दशा । |
| सीरपाणिः | - | सीरः पाणौ यस्य सः । |
| नवपयोदः | - | नवश्च असौ पयोदः च । |
| चण्डांशुकिरणैः | - | चण्डाः अंशवः अस्य इति चण्डांशुः, चण्डांशोः किरणाः तैः । |
| भूलोकसेविनी | - | भूलोकस्य सेविनी । |
| कालिन्दी | - | कलिन्दात् प्रभूता । |
| सर्वंसहा | - | सर्वं सहते इति । |
| कोपान्धः | - | कोपेन अन्धः यः सः । |

अम्बारवम् - अम्बा इति रवः तम्।

## कोशः

| | | |
|---|---|---|
| बलभद्रः | - | बलभद्रो प्रलम्बघ्नो कामपालो हलायुधः<br>सङ्कर्षणः सीरपाणिः कालिन्दीभेदनो बलः। |
| कालिन्दी | - | कालिन्दी सूर्यतनया यमुना शमनस्वसा। |
| सीरः | - | सीरस्तु लाङ्गलं गोदारणं हलम्। |
| स्रोतस्विनी | - | सिन्धुः शैवलिनी वहा च ह्रदिनी स्रोतस्वीनी निम्नगा। |
| प्रणाली | - | द्वयोः प्रणाली पयसःपदव्याम्। |
| भूमी | - | सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा। |

# पठनप्रवर्तनानि



**कथां भावानुसारम् अवतारयतु ।**

**श्रद्धेयाः अंशाः**

उच्चारणशुद्धिः।

भावात्मकता।

आशयावगमनम्।



**पाठभागात् समानार्थकपदानि चित्वा लिखतु।**

उदा - कालिन्दी – कलिन्दजा, सूरजा।

बलदेवः -

सीरः -

क्षितिः -

दशा -

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।

उचितपदचयनम्।



## अधोदत्तवाक्यानि पठित्वा शतृ-शानजन्तरूपाणि विविच्य लिखतु।

**उदा -** जनसमूहः प्रकृतिदुरन्तं पश्यन् कम्पमानः अभवत्।

**शतृ - पश्यन्।**
**शानच् - कम्पमानः।**

**क)** मुख्यसचिवः शुभम् आशंसमानः प्रभाषणं कुर्वन् अस्ति।

**ख)** युवजनोत्सवे विजयम् इच्छन् छात्रः नितरां यतमानः अवर्तत।

**ग)** सः गीतं शृण्वन् पचमानः अस्ति।

**घ)** भूस्खलनेन प्रातिवेशिकस्य भवनं भग्नं पश्यन् बालः तपमानः अवर्तत।

**ङ)** शिष्यं पाठयन् अध्यापकः मोदमानः अवर्तत।

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।
उचितपदचयनम्।



## पाठभागात् क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि अव्ययानि चित्वा लिखतु।

उदा-

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| कृत्वा | स्वीकृत्य | व्यवहर्तुम् |

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।
उचितपदचयनम्।



## उदाहरणानुसारं वाक्यं परिवर्तयतु।

**उदा -** कक्ष्यायां **मोहनः** ऋते सर्वे सन्ति।

कक्ष्यायां **मोहनात्** ऋते सर्वे सन्ति।

**क)** गृहे जनकः ऋते सर्वे सन्ति।

**ख)** उद्याने पाटलस्य ऋते सर्वाणि पुष्पाणि सन्ति।

**ग)** आपणात् पटोलेन ऋते सर्वम् आनीतम्।

**घ)** ग्रन्थालये कुमारसम्भवः ऋते अन्यत् सर्वमस्ति।

**श्रद्धेयौ अंशौ**

अर्थावगमनम्।
वाक्यपरिवर्तनसामर्थ्यम्।

**'तव कारुण्यमेव तृणान्येतानि। तव प्रेम एव क्षीररूपेण प्रवहति' - इति पङ्क्तिं विमृश्य 'नदीनां कालिकप्राधान्यम्' इति विषये चर्चां नयतु।**

**श्रद्धेयाः अंशाः**

भागभाक्त्वम्।
अवतरणशैली।
विषयापग्रथनम्।

## क्रियापदपरिचयः

**न्यपतत् -** नि उपसर्गपूर्वक पत्लृ गतौ परस्मैपदी लङ् प्र.पु. ए.व।
न्यपतत् - न्यपतताम् - न्यपतन्।

**निषसाद -** नि उपसर्गपूर्वक षद्लृ (सद्) विशरणगत्यवसादनेषु परस्मैपदी लिट् प्र.पु. ए.व।
निषसाद -निषेदतुः - निषेदुः।

**जायते -** जनी प्रादुर्भावे आत्मनेपदी लट् प्र.पु.ए.व।
जायते - जायेते - जायन्ते।

**व्यदारयत् -** वि उपसर्गपूर्वक दॄ हिंसायां (णिचि) परस्पमैपदी लङ् प्र.पु.ए.व।
व्यदारयत् - व्यदारयताम् - व्यदारयन्।

**प्रार्थये -** प्र उपसर्गपूर्वक अर्थ याच्ञायाम् आत्मनेपदी लट् उ.पु.ए.व ।
प्रार्थये - प्रार्थयावहे - प्रार्थयामहे ।

**प्रावहत् -** प्र उपसर्गपूर्वक वह प्रापणे परस्मैपदी लङ् प्र.पु.ए.व ।
प्रावहत् - प्रावहताम् - प्रावहन् ।

क्षितिरार्द्रा भवति चेत् सा वृक्षलतादिभिः सुसम्पन्ना भविष्यति । अस्मान् परितः विद्यमानेषु सस्यजालेषु अस्माकं नित्योपयोगक्षमाणां केषाञ्चन सस्यानां नामानि गुणान् च लिखतु ।

# तृतीयः पाठः

# केरलारामः

## पाठप्रवेशः

औषधमिति यदा श्रूयते तदा औषधसस्यानां चित्रमेव मनसि प्रथममागच्छति । अस्मान् परितः बहूनि औषधसस्यानि विराजन्ते । तेषु निम्बः, आमलकी, हरिद्रा, तुलसी, कर्णिकारः, अशोकः इत्यादीनि सस्यानि बहुधा प्रथितानि । एतेषाम् औषधगुणान् भवन्तः ज्ञातवन्तः खलु । अस्मद्देशीयाः इव वैदेशिकाः अपि एतेषाम् औषधगुणान् विज्ञाय निरन्तरोपयोगाय तानि स्वीचक्रुः । कृष्णमरिचस्य 'यवनप्रियम्' इति नामान्तरं तस्य वैदेशिकप्रियत्वं संसूचयति । औषधानां रूपरसगुणादीन् अधिकृत्य वैदेशिकैः अनेके ग्रन्थाः विरचिताः । तेषु अन्यतममधिकृत्य पठामः ।

## आमुखम्

वैदिककालादारभ्य औषधसस्यानां रसगुणादिवैशिष्ट्यम् अधिकृत्य अस्मत्पूर्विकाः ज्ञानं सम्पादितवन्तः । वनेचरगोपालकाद्याः जनाः एव एतेषां नामगुणरूपवैशिष्ट्यानि प्रथमतया ज्ञातवन्तः। वनौकोभ्यः प्राप्तमिदं सस्यानाम् आकृतिगुणनामादिकं विज्ञानं स्वीकृत्य पश्चात् शास्त्रकाराः संस्कृत्य शास्त्रान्तरेषु प्रदर्शयन्ति स्म । एवं सस्यानाम् औषधगुणादिकमधिकृत्य विरचितेषु संस्कृतग्रन्थेषु प्रमुखाः भवन्ति धन्वन्तरीनिघण्टुः, राजनिघण्टुः, भावप्रकाशनिघण्टुः, मदनपालनिघण्टुः, द्रव्यगुणसङ्ग्रहः, औषधनिघण्टुः इत्यादयः। एवं केरलेषु विद्यमानानां बहूनामपि सस्यानां महत्त्वप्रकाशनाय विरचितं **होर्त्तूस् मलबारिक्कूस्** नाम ग्रन्थम् अत्र परिचिनुमः।




एवमारभते कस्यचित् ग्रन्थतल्लजस्य भूमिका । **होर्त्तूस् मलबारिक्कूस्** (Hortus Malabaricus ) इत्यस्ति अस्य ग्रन्थस्य नाम । ग्रन्थेऽस्मिन् मलबार् प्रदेशेषु विद्यमानानां प्रमुखानां सस्यानां वैशिष्ट्यं प्रतिपादयति । नेतर्लाण्ड्देशस्य आंस्टर्डां नगरात् १६७८ तमे वर्षे ग्रन्थोऽयं प्रकाशितः । होर्त्तूस् मलबारिक्कूस् इति लाट्टिन् पदस्य अर्थः **मलबार् प्रदेशस्य उद्यानम्** इति भवति ।

प्रख्यातस्य डच् सैनिकस्य **हेन्ड्रिक् वान् रीड्** Hendrik Van Rheede महाभागस्य इच्छाशक्तेः सत्फलमेव होर्त्तूस् मलबारिक्कूस् । केरलेषु उपलब्धानां बहूनां सस्यानाम् औषधगुणान् सः स्वानुभवेन दृष्टान्तेन च ज्ञातवान् । स तेषां समस्तमपि चरित्रं गुणं च स्वकीयान् जनान् उद्बोधयितुम् अभिलषति स्म । तदर्थं स केषाञ्चन केरलीयानां पण्डितानां साहाय्येन बहूनि सस्यानि समाहरत् । तदनु तेषां मूलं, काण्डं, पत्रं, पुष्पं, फलं, बीजम्, इत्यादीनां सर्वेषां सचित्रविवरणं संयोज्य ग्रन्थं व्यरचयत् ।



एवं ग्रन्थरचनायै साहाय्यं प्रदत्तेषु केरलीयपण्डितेषु प्रमुखोऽस्ति **इट्टि अच्युतन्** महाभागः । 'कोल्लाट्ट् वैद्यन्' इति प्रख्यातः सः वैद्यः स्वस्य समस्तमपि ज्ञानम् अस्य ग्रन्थस्य रचनायै समार्पयत् । कोल्लाट्ट् वैद्यकुटुम्बस्य पारम्पर्यसस्यविज्ञानं समस्तं 'चोल् केट्ट पुस्तकम्' इति ग्रन्थे पूर्वमेव समाहृतमासीत् । तस्य वैद्यग्रन्थस्यापि साहाय्येन विरचितं भवति होर्त्तूस् मलबारिक्कूस् । रङ्गभट्ट्, अप्पुभट्ट्, विनायकपण्डिट् इति त्रयः पण्डिताः मदनपालनिघण्टोः साहाय्येन अधिकविवरणं च अयच्छन् । एवं बृहदाकारैः द्वादशविभागैः विरचितोऽस्ति होर्त्तूस् मलबारिक्कूस् ।



ग्रन्थेऽस्मिन् ७४२ सस्यानां समस्तमपि विवरणं सचित्रं प्रस्तौति । कल्पवृक्ष इति प्रख्यातस्य नालिकेरवृक्षस्य गुणस्वरूपादीनि अस्मिन् प्रथमतया वर्णितानि । लाट्टिन्, मलयालम्, अरबिमलयालम्, देवनागरी इति चतसृभिः लिपिभिः सस्यानां नामलेखनम् अत्र दृश्यते । इदं प्रथमतया मलयाललिपिः अस्मिन् ग्रन्थ एव मुद्रिता अभवत् । एतस्य ग्रन्थस्य अध्ययनेन प्राचीनानां केरलीयानां सामान्यचरितं च ज्ञातुं शक्यते ।

इट्टि अच्युतस्य आदरसूचनार्थम् आञ्जिलिवृक्षस्य वंशे समुत्पन्नस्य कस्यचित् नूतनसस्यस्य 'अच्युदेमिया' इति नामकरणं कृतम् । एष ग्रन्थः सस्यशास्त्रज्ञानां, चरित्रपिपठिषूणां बहूपकारकोऽस्ति ।







**पदच्छेदः**

| | | |
|---|---|---|
| ग्रन्थ एव | - | ग्रन्थे + एव । |
| कल्पवृक्ष इति | - | कल्पवृक्षः + इति । |
| ग्रन्थेऽस्मिन् | - | ग्रन्थे + अस्मिन् । |
| विवरणञ्च | - | विवरणम् + च । |
| प्रमुखोऽस्ति | - | प्रमुखः + अस्ति । |

**विग्रहः**

| | | |
|---|---|---|
| वनौकोभ्यः | - | वनम् ओकः येषां ते वनौकसः, तेभ्यः । |
| शास्त्रान्तरेषु | - | अन्यत् शास्त्रं शास्त्रान्तरम्, तेषु । |
| सचित्रम् | - | चित्रेण सह वर्तते । (यस्मिन् कर्मणि तद्यथा तथा ।) |
| प्रख्यातस्य | - | प्रकर्षेण ख्यातः प्रख्यातः, तस्य । |
| विज्ञानम् | - | विशिष्टं ज्ञानम् । |
| ग्रन्थतल्लजः | - | प्रशस्तः ग्रन्थः । |
| चरित्रपिपठिषूणाम् | - | पठितुम् इच्छुः पिपठिषुः, चरित्रस्य पिपठिषुः, तेषाम् । |

## पठनप्रवर्तनानि

**'होर्त्तूस् मलबारिक्कूस्' इति ग्रन्थमधिकृत्य सूचनानुसारं लघूपन्यासं लिखतु ।**

**सूचनाः** – केरलीयसस्यविज्ञानं - हेन्ड्रिक् वान् रीड् - इट्टि अच्युतन् - सचित्रविवरणं- मलयाललिपिः- केरलीयचरित्रपठनम् ।

**श्रद्धेयाः अंशाः**

सूचनानां स्वीकारः ।
वाक्यशुद्धिः ।
उपक्रमाद्या उपन्यासघटना ।

**अन्तर्जालस्य/पुस्तकस्य साहाय्येन अधोदत्तानां सस्यानाम् औषधगुणान् लिखतु।**

| सस्यम् | | औषधगुणम् |
|---|---|---|
| उदा - निम्बः | - | व्रणनाशकः। |
| आमलकी | - | ........................। |
| तुलसी | - | ........................। |
| हरीद्रा | - | ........................। |
| अशोकः | - | ........................। |
| कर्णिकारः | - | ........................। |
| ईश्वरमूली | - | ........................। |
| शङ्खुपुष्पी | - | ........................। |
| ब्रह्मी | - | ........................। |

**श्रद्धेयः अंशः**

चयनसामर्थ्यम् ।

**यथोचितं योजयत।**

| | | |
|---|---|---|
| क) इट्टि अच्युतन् | - | डच् देशीयः । |
| ख) कृष्णमरिचम् | - | वैद्यशास्त्रकोशः। |
| ग) द्रव्यगुणसंग्रहः | - | कोल्लाट्टु वैद्यन्। |
| घ) ऊर्जप्रदायिनी | - | यवनप्रियम्। |
| ङ) हेन्ड्रिक् वान् रीड् | - | आमलकी। |

**श्रद्धेयः अंशः**

उचितरीत्या क्रमीकरणम्।

**युष्मान् परितः विद्यमानानाम् औषधसस्यानां वीडियो/ सम्पुटं रचयतु।**

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम्।

उचितरीत्या क्रमीकरणम्।

**अधोदत्तान् सम्भाषणांशान् संभाव्य पूरयत ।**

छात्रः - भो आचार्य !........................ ।

वैद्यः - नमस्ते । .............................. ?

छात्रः - अहम् औषधसस्यान्यधिकृत्य ज्ञातुम् आगतोऽस्मि ।

वैद्यः - पृच्छतु । अहं वदामि ।

छात्रः - .............................. ?

वैद्यः - आम् । कैरल्याम् इदानीमपि औषधसस्यानां सचित्रविवरणग्रन्थाः विरच्यन्ते ।

छात्रः - एवं चेत् कस्यचित् ग्रन्थस्य नाम कृपया वदतु ।

वैद्यः - 'औषधसस्यङ्ङल् ।'

छात्रः - .............................. ?

वैद्यः - डा. एस्, नेशमणि महोदयः भवति अस्य ग्रन्थस्य कर्ता ।

छात्रः - .............................. ?

वैद्यः - अस्य प्रकाशकः केरलभाषा इन्स्टिट्यूट् भवति ।

छात्रः - सन्तुष्टोऽस्मि । धन्यवादः ।

**श्रद्धेयाः अंशाः**

आशयव्यक्तता ।

उचितपूरणम् ।

प्रश्ननिर्माणचातुर्यम् ।

## क्रियापदपरिचयः

**प्रस्तौति -** प्र उपसर्गपूर्वक ष्टुञ् स्तुतौ उभयपदी परस्मैपदे लट् प्र.पु. ए.व ।
प्रस्तौति - प्रस्तुतः - प्रस्तुवन्ति ।

**शक्यते-** शक्लृ शक्तौ कर्मणि आत्मनेपदी लट् प्र.पु. ए.व।
शक्यते - शक्येते - शक्यन्ते।
शक्नोति - शक्नुतः - शक्नुवन्ति (कर्तरि- परस्मैपदी)

**व्यावर्तत -** वि आङ् उपसर्गपूर्वक वृतु वर्तने आत्मनेपदी लङ् प्र.पु.ए.व।
व्यावर्तत - व्यावर्तेताम् - व्यावर्तन्त।

**समार्पयत् -** सम् पूर्वकस्य ऋ गतौ (णिच्) परस्मैपदी लङ् प्र.पु.ए.व।
समार्पयत् - समार्पयताम् - समार्पयन्।

**अयच्छन् -** दाण् दाने परस्मैपदी लङ् प्र.पु.ब.व।
अयच्छत् - अयच्छताम् - अयच्छन्।
(दाण् धातोः लट्, लोट्, लङ्, विधिलिङ् लकारेषु यच्छ् आदेशः)

**समाहरत् -** सम्+आ उपसर्गपूर्वक हृञ् हरणे उभयपदी परस्मैपदे लङ् प्र.पु.ए.व।
समाहरत् - समाहरताम् - समाहरन्।

## अधिकवाचनांशः

**ग्रन्थतल्लजः** - प्रशस्तः ग्रन्थः। तल्लजशब्दः प्रशस्तवाचकः।
मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ
प्रशस्तवाचकान्यमूनि - इत्यमरः।

उदा- प्रशस्तः पण्डितः इत्यर्थे -

| | | |
|---|---|---|
| मतल्लिका | - | पण्डितमतल्लिका |
| मचर्चिका | - | पण्डितमचर्चिका |
| प्रकाण्डम् | - | पण्डितप्रकाण्डम् |
| उद्धः | - | पण्डितोद्धः |
| तल्लजः | - | प्रशस्तः ग्रन्थः ग्रन्थतल्लजः |

# शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अनावृष्टिः | वर्षाराहित्यम् | മഴയില്ലായ്മ | ಮಳೆ ಕೊರತೆ | Lack of rain |
| आनन्त्यम् | अनन्तम् | പരിമിതിയില്ലാത്ത | ಅನಿಯಮಿತ | Infinite |
| आरामः | उद्यानम् | പൂന്തോട്ടം | ಉದ್ಯಾನ | Garden |
| ऊषरः | शुष्कप्रदेशः | വരണ്ട പ്രദേശം | ಬಂಜರು ಪ್ರದೇಶ | Dry land |
| कलिन्दजा | यमुना | യമുനാനദി | ಯಮುನಾ ನದಿ | River Yamuna |
| कोटरः | वृक्षरन्ध्रः | മരത്തിന്റെ ദ്വാരം | ಮರದ ರಂಧ್ರ | Tree hole |
| घनम् | सान्द्रम् | ഇടതൂർന്നത് | ದಟ್ಟವಾದ | Dense |
| चकास्ति | शोभते | ശോഭിക്കുന്നു | ಶೋಭಿಸುತ್ತದೆ | Shines |
| चारु | मनोहरः | മനോഹരം | ಸುಂದರ | Beautiful |
| तारापथम् | गगनम् | ആകാശം | ಆಕಾಶ | The Sky |
| दरी | कन्दरम् | ഗുഹ | ಗುಹೆ | The cave |
| धूलीकलापः | रजःसमूहः | പൊടിപടലം | ಧೂಳಿನ ರಾಶಿ | A cloud of dust |
| नकुलः | सर्पहा | കീരി | ಮುಂಗುಸಿ | Mongoose |
| नवपयोदः | नवमेघः | പുതുമേഘം | ಹೊಸ ಮೋಡ | New cloud |
| निर्झरी | प्रवाहिनी | അരുവി | ಸ್ಟ್ರೀಮ್ | The stream |
| निशान्तम् | वासस्थानम् | വാസസ്ഥലം | ನಿವಾಸ | Residence |
| निषसाद | उपविशति स्म | ഇരുന്നു | ಕುಳಿತರು | Sat |
| नीडजः | खगः | പക്ഷി | ಹಕ್ಕಿ | Bird |
| पयस्विनी | नदी | നദി | ನದಿ | The river |
| पयःप्रणाली | कुल्या | കൈത്തോട് | ಕೈತೋಡು | Canal |
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധമായത് | ಪ್ರಸಿದ್ಧ | Famous |
| बन्धुरम् | निम्नोन्नतम् | ഉയർന്നതും താഴ്ന്നതും | ಎತ್ತರ ತಗ್ಗು | The high and the low |

| | | | | |
|---|---|---|---|---|
| बर्ही | मयूरः | മയിൽ | ನವಿಲು | Peacock |
| बिलम् | द्वारम् | മാളം | ಬಿಲ | Hole |
| महीधरः | पर्वतः | പർവ്വതം | ಪರ್ವತ | The moun-<br>tain |
| राजिः | समूहः | കൂട്ടം | ಗುಂಪು | Group |
| वत्सः | गोशावकः | പശുക്കുട്ടി | ಕರು | The calf |
| वनप्रियः | कोकिलः | കുയിൽ | ಕೋಗಿಲೆ | Cuckoo |
| शाखामृगः | वानरः | കുരങ്ങൻ | ಕೋತಿ | Monkey |
| सानुः | उपत्यका | താഴ്‌വാരം | ಕಣಿವೆ | Valley |
| सीरपाणिः | हलायुधः | ബലരാമൻ | ಬಲರಾಮ | Balarama |

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| कविताम् आलपति । | | | |
| शतृ-शानच् पदानि चिनोति । | | | |
| लघूपन्यासं लिखति । | | | |
| सस्यसम्पुटं निर्माति । | | | |
| यथोचितं योजयति । | | | |
| सम्भाषणांशान् पूरयति । | | | |
| जीवनचरितं रचयति । | | | |

पूर्वस्यां कक्ष्यायां पठितानि कथानाटकादीनि अधिकृत्य चर्चां नयतु ।

# एककम् २

# लावण्यम्

## आमुखम्

प्रकृतिसंरक्षणेन अस्माकं जीवनं सुकरं स्यात्। एवं सुखेन जीवितं नीयमानः मानवः साहित्यादीनां लावण्यम् अनुभोक्तुम् इच्छति । लावण्यं नामके अस्मिन्नेकके द्वौ पाठौ स्तः। महाकवेः कालिदासस्य रघुवंशमहाकाव्यात् समाकलिता श्लोकसञ्चयरूपा **काव्यदीपशिखा** इति एकः, कैरलीहास्यसम्राजः सञ्जयस्य जीवनचरितप्रतिपादकः **सञ्जय उवाच** इति अपरः पाठश्च । लावण्यमिति एककस्य पठनेन साहित्यसौन्दर्यानुभवे कुतुकिनः स्याम।

# चतुर्थः पाठः

# काव्यदीपशिखा

## पाठप्रवेशः

महाकाव्यानां पठनेन पौराणिकानां कवीनां कल्पानाचातुर्यं तत्कालसामाजिकानां व्यवहारं च अवगन्तुं शक्यते । अनेकेषु महाकाव्येषु सत्स्वपि पञ्चमहाकाव्यानि अतिप्रसिद्धानि भवन्ति । तेषु अन्यतममस्ति रघुवंशम् । तस्मात् सङ्कलितान् चतुरः श्लोकान् अत्र परिचिनुमः।

## आमुखम्

संस्कृतसाहित्ये अनेकानि महाकाव्यानि सन्ति । तेषु कालिदासस्य कुमारसम्भवम्, रघुवंशम्, भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितं च पञ्चमहाकाव्यानि इति प्रथितानि । एतेषां महाकाव्यानां रचनावसरे भाषाप्रयोगाणां वैशिष्ट्येन कालिदासः 'दीपशिखाकालिदासः' इति, भारविः 'छत्रभारविः' इति, माघः 'घण्टामाघः' इति च पश्चात् प्रसिद्धाः अभवन् । नैषधीयचरितं काव्यं 'विद्वदौषधम्' इति च । रघुवंशस्य षष्ठसर्गे इन्दुमत्याः स्वयंवरसन्दर्भः उपवर्णितः । तत्र प्रयुक्तस्य अलङ्कारस्य चारुतया कालिदासः 'दीपशिखाकालिदासः' इति प्रसिद्धिम् अवाप । तमेव सन्दर्भम् अत्र पठामः ।

**स्वसुर्विदर्भाधिपतेस्तदीयो**
**लेभेऽन्तरं चेतसि नोपदेशः ।**
**दिवाकरादर्शनबद्धकोशे**
**नक्षत्रनाथांशुरिवारविन्दे ॥**

### पदच्छेदः

| | | |
|---|---|---|
| स्वसुर्विदर्भाधिपतेस्तदीयो | - | स्वसुः + विदर्भाधिपतेः + तदीयः । |
| लेभेऽन्तरं | - | लेभे + अन्तरम् । |
| नोपदेशः | - | न + उपदेशः । |
| नक्षत्रनाथांशुरिव | - | नक्षत्रनाथांशुः + इव । |

### विग्रहः

| | | |
|---|---|---|
| विदर्भाधिपतेः | - | विदर्भस्य अधिपतिः विदर्भाधिपतिः,तस्य । |
| दिवाकरादर्शनबद्धकोशे | - | दिवाकरस्य अदर्शनेन बद्धः कोशः, तस्मिन् । |
| नक्षत्रनाथांशुः | - | नक्षत्राणां नाथः नक्षत्रनाथः(चन्द्रः) तस्य अंशुः । |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| विदर्भाधिपतेः | - | विदर्भराजस्य (भोजस्य) |
| स्वसुः | - | सोदर्याः |
| चेतसि | - | मनसि |
| तदीयः उपदेशः | - | तया कृतं विवरणम् |
| दिवाकरादर्शनबद्धकोशे | - | सूर्यस्य अदर्शनेन सङ्कुचिते |
| अरविन्दे | - | पद्मे |
| नक्षत्रनाथांशुः इव | - | चन्द्रमयूखः इव |
| अन्तरं | - | प्रवेशं |
| न लेभे । | - | न अलभत । |

**भावार्थः**

विदर्भाधिपस्य सोदर्याः इन्दुमत्याः सखी कञ्चन राजकुमारम् अधिकृत्य सविस्तरं प्रत्यपादयत् । तथापि सूर्यास्तमने मुकुलाकारे कमलोदरे चन्द्रकिरणः इव इन्दुमत्याः मनसि तस्याः उपदेशः न प्रविष्टः ।

**कोशः**

चेतः – चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः ।



**सञ्चारिणी दीपशिखेव रात्रौ**
**यं यं व्यतीयाय पतिंवरा सा ।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे**
**विवर्णभावं स स भूमिपालः ॥**

**पदच्छेदः**

दीपशिखेव - दीपशिखा + इव।

**विग्रहः**

पतिंवरा - पतिं वृणीते या सा।

नरेन्द्रमार्गाट्टः - नरेन्द्रस्य मार्गः नरेन्द्रमार्गः, तत्रस्थः अट्टः।

भूमिपालः - भूमिं पालयति इति।

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पतिंवरा | - | स्वयंवरसन्नद्धा |
| सा | - | इन्दुमती |
| रात्रौ | - | निशायां |
| सञ्चारिणी | - | सञ्चरणशीला ( गमनशीला ) |
| दीपशिखा इव | - | दीपज्वाला इव |
| यं यं व्यतीयाय | - | यं यं राजानम् अतीत्य गता |
| स स भूमिपालः | - | स स भूपालः |
| नरेन्द्रमार्गाट्ट इव | - | राजपथे स्थितः निरीक्षणालयः इव |
| विवर्णभावम् | - | (निराशया) वैवर्ण्यं |
| प्रपेदे | - | प्राप्तवान्। |

**भावार्थः**

रात्रौ सञ्चरणशीला दीपशिखा यथा नरेन्द्रमार्गं प्रपद्य अट्टान् अतीत्य तान् निष्प्रभान् करोति तथा पतिंवरा सा कुमारी यं यं राजकुमारम् अतीतवती तस्य तस्य मुखं विगतवर्णम् अभवत्।



**तं प्राप्य सर्वावयवानवद्यं**
**व्यावर्ततान्योपगमात्कुमारी ।**
**न हि प्रफुल्लं सहकारमेत्य**
**वृक्षान्तरं काङ्क्षति षट्पदाली ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| व्यावर्ततान्योपगमात्कुमारी | - | व्यावर्तत + अन्योपगमात् + कुमारी । |
| सहकारमेत्य | - | सहकारम् + एत्य । |

### विग्रहः

| | | |
|---|---|---|
| सर्वावयवानवद्यं | - | न अवद्यः अनवद्यः, सर्वे च ते अवयवाश्च सर्वावयवाः सर्वावयवेषु अनवद्यः यस्य सः सर्वावयवानवद्यः, तं सर्वावयवानवद्यम् । |
| अन्योपगमात् | - | अन्यस्य उपगमः अन्योपगमः , तस्मात् । |
| वृक्षान्तरम् | - | अन्यः वृक्षः । |
| षट्पदाली | - | षट्पदानाम् आली । |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| कुमारी | - | इन्दुमती |
| सर्वावयवानवद्यम् | - | सर्वावयवरम्यम् |
| तं प्राप्य | - | अजम् उपगम्य |
| अन्योपगमात् | - | राजान्तरसमीपगमनात् |
| व्यावर्तत | - | विमुखा अभवत् । |
| हि | - | यतः |
| षट्पदाली | - | भृङ्गावलिः |
| प्रफुल्लम् | - | विकसितम् |
| सहकारम् | - | चूतम् |
| एत्य | - | प्राप्य |
| वृक्षान्तरम् | - | अपरवृक्षम् |
| न कांक्षति | - | न इच्छति । |

### भावार्थः

भृङ्गाः प्रफुल्लं चूतवृक्षम् सम्प्राप्य अन्यं वृक्षं गन्तुं नेच्छन्ति तथा सा इन्दुमती अङ्गलावण्ययुक्तं तं राजकुमारम् उपगम्य ततः गन्तुं नोत्सुका अभवत् ।

**कोशः**

षट्पदः-

मधुव्रतो मधुकरो मधुलिण्मधुपालिनः।
द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः॥



**कुलेन कान्त्या वयसा नवेन**
**गुणैश्च तैस्तैर्विनयप्रधानैः ।**
**त्वमात्मनस्तुल्यममुं वृणीष्व**
**रत्नं समागच्छतु काञ्चनेन ॥**

**पदच्छेदः**

| | | |
|---|---|---|
| गुणैश्च | - | गुणैः + च । |
| तैस्तैर्विनयप्रधानैः | - | तैः + तै: + विनयप्रधानै : । |
| त्वमात्मनस्तुल्यममुम् | - | त्वम् + आत्मनः + तुल्यम् + अमुम् । |

**विग्रहः**

विनयप्रधानैः - विनयः प्रधानं येषां , तैः।

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| कुलेन | - | गोत्रेण |
| कान्त्या | - | लावण्येन |
| नवेन वयसा | - | यौवनेन |
| विनयप्रधानैः | - | विनयप्रकृतिभिः |
| तैस्तैर्गुणैश्च | - | श्रुतशीलादिभिः गुणैःच |
| आत्मनस्तुल्यं | - | स्वानुरूपं |
| अमुं | - | एनम् अजं |
| त्वं वृणीष्व | - | त्वं स्वीकुरु । |

| | | |
|---|---|---|
| रत्नं | - | मणिः |
| काञ्चनेन | - | सुवर्णेन (सह) |
| समागच्छतु | - | संगच्छताम्। |

**भावार्थः**

एषः अजः सूर्यवंशोद्भवः भवति । कान्त्या तारुण्येन विनयादिभिः शीलगुणैश्च अनुरूपः अयं राजकुमार एव ते योग्यः। रत्नं सुवर्णेन सह एव समागच्छतु।

**कोशः**

| | | |
|---|---|---|
| कुलम् | - | सन्ततिर्गोत्रजननकुलान्यभिजनान्वयौ। |
| रत्नम् | - | रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च। |

## पठनप्रवर्तनानि



**पाठभागस्थान् श्लोकान् वैयक्तिकरूपेण सङ्घरूपेण वा कक्ष्यायाम् आलपतु।**

**श्रद्धेयाः अंशाः**

अक्षरस्फुटता।

पदार्थबोधः।

आशयव्यक्तता।



**पाठभागस्थानां श्लोकानां गद्यक्रमं लिखतु।**

**श्रद्धेयाः अंशाः**

आशयावबोधः।

विशेषणविशेष्यज्ञानम्।

उचितः वाक्यप्रयोगः।



## पञ्चमहाकाव्यान्यधिकृत्य सूचनानुसारं टिप्पणीं लिखतु ।

**सूचनाः -** काव्यभेदः - श्रव्यकाव्यानि - प्रसिद्धाः संस्कृतकवयः - पञ्चमहाकाव्यानि - तेषां कर्तारः ।

**श्रद्धेयाःअंशाः**

भाषाशुद्धिः।

आशयव्यक्तता ।

सूचनानां स्वीकारः ।

टिप्पणीघटना ।



## इष्टतमश्लोकस्य आस्वादनटिप्पणीं लिखतु ।

**श्रद्धेयाःअंशाः**

भाषाशुद्धिः।

आशयव्यक्तता ।

श्लोकानाम् अर्थावबोधः ।

## क्रियापदपरिचयः

**व्यतीयाय** - वि अति उपसर्गपूर्वक इण् गतौ परस्मैपदी लिट् प्र.पु.ए.व ।
व्यतीयाय - व्यतीयतुः - व्यतीयुः ।

**प्रपेदे** - प्र उपसर्गपूर्वक पत्लृ गतौ आत्मनेपदी लिट् प्र.पु.ए.व ।
प्रपेदे - प्रपेदाते - प्रपेदिरे ।

**व्यावर्तत** - वि+आ+वृतु वर्तने आत्मनेपदी लङ् प्र.पु.ए.व ।
व्यावर्तत - व्यावर्तेताम् - व्यावर्तन्त ।

**वृणीष्व** - वृञ् वरणे उभयपदी आत्मनेपदे लोट् म.पु.ए.व ।
वृणीष्व - वृण्वाथाम् - वृणुध्वम् ।

## अधिकवाचनांशः

### कालिदासस्य कृतयः ।

| | | |
|---|---|---|
| **द्वे महाकाव्ये** | - | रघुवंशम् , कुमारसम्भवम् च । |
| **त्रीणि नाटकानि** | - | अभिज्ञानशाकुन्तलम् , विक्रमोर्वशीयम् , मालविकाग्निमित्रम् । |
| **द्वे खण्डकाव्ये** | - | ऋतुसंहारः, मेघदूतम् । |

### बिरुदालङ्कृताः केचन कवयः

| | | |
|---|---|---|
| कालिदासः | - | दीपशिखा कालिदासः । |
| श्रीकण्ठः | - | भवभूतिः । |
| भारविः | - | छत्रभारविः। |
| माघः | - | घण्टामाघः। |
| मुरारिः | - | इन्दुमुरारिः |
| बाणः | - | तुरङ्गबाणः । |



तूलिकानाम्ना प्रसिद्धानां केषाञ्चन साहित्यकाराणां नामानि वदन्तु ।

# पञ्चमः पाठः

# सञ्जय उवाच ।

## पाठप्रवेशः

पूर्वस्मिन् पाठे कालिदासमहाकवेः महाकाव्याद् उद्धृतान् कांश्चन श्लोकान् वयम् अपठाम खलु ? तत्र नवरसेषु को रसः वर्तते ? स्वयंवरस्य वर्णनया अत्र शृङ्गार एव मुख्यो रसः । अन्ये कति रसाः सन्ति ? तेषु रसेषु भवताम् इष्टतमः रसः कः ? तस्य कारणं किम् ?

## आमुखम्

संस्कृतसाहित्येभ्यः बहूनि काव्यरत्नानि स्वीकृत्य एव कैरलीसाहित्यं तस्य बाल्यदशायां समृद्धम् अभवत् । तथा कालिदासादीनां काव्येभ्यः बहवः केरलीयकवयः अनेकान् श्लोकान् यथासन्दर्भं स्वीकृतवन्तः । तेषु हास्यरसप्रधानान् अंशान् स्वीकृत्य समर्थया रीत्या प्रयुक्तवानस्ति सञ्जयः। सरसकवेः तोलस्य, महाकवेः कुञ्चन् नम्ब्यार् महाशयस्य च मार्गमवलम्ब्य संस्कृतसाहित्यस्यापि साहाय्येन सञ्जयः विविधाभिः हास्यरचनाभिः समाजिकविमर्शनम् अकरोत् । तस्य महात्मनः लघुजीवनचरितमेव अत्र पठामो वयम् ।

हास्यकणिका-1




हास्यकणिका-2




सञ्जय उवाच

"संस्कृतमहाकवयः हास्यचित्रणे प्रायेण विमुखाः भवन्ति इति केचिन्मन्यन्ते । अभिमतोऽयं पूर्णतया सत्यं न भवति । महाकविः कालिदासोऽपि बहुप्रकारेण हसितवान् इति वस्तुतां तस्य महाकाव्येभ्यो द्रष्टुं शक्यते । स्वकीयासु कृतिषु स महाकविः अतिसूक्ष्मतया प्रयोगचारुतया बहुत्र हास्यप्रयोगम् अकरोत् । बाह्यदर्शने प्रसन्नपूर्णेष्वपि तस्य काव्यप्रवाहेषु अतिगम्भीराः विकारगर्त्ताश्च सन्ति"।

"विकारशीलानां जीवितं दुःखभूयिष्ठं भवति। विचारशीलानां तु जीवितम् आनन्दपूर्णं च भवति" इति वदन् सञ्जयः साहित्यविचारेणैव जीवितं निनाय। पुत्रकलत्रयोः अकालमृत्युं, राजयक्ष्मणा तेन अनुभूयमानम् आत्मक्लेशञ्च नितरां विस्मृत्य हास्यरसप्रधानाभिः रचनाभिः सः अनुवाचकान् बहुप्रकारेण हासयति स्म । समाजे वर्तमानानि अनौचित्यानि निरीक्ष्य तानि स्वतूलिकया निशितरूपेण विमृश्य स्वयम् अहसच्च ।

संस्कृतम्, मलयालम्, आङ्गलेयम् इत्यादिषु भाषासु निष्णातः आसीदयं महात्मा । कञ्चित्कालं पालक्काट् विक्टोरिया कोलेज्, मलबार् क्रिस्त्यन् कोलेज् इत्येतयोः महाविद्यालययोः आङ्गलभाषाध्यापकवृत्तिं निनाय । तस्मिन् समये षेक्स्पियर् महाकवेः

ओथल्लो नाम नाटकस्य कैरलीविवर्तनं कृतवान् । भगवद्गीता, ज्योतिषम् इत्यादिषु अतीवतत्परोऽयं तेषां पठने निमग्नः सन् तेषु सविशेषज्ञानं सम्पादितवान् । "सञ्जयन्" इति तूलिकानाम स्वीकृत्य पश्चात् प्रसिद्धस्य तस्य यथार्थनाम माणिक्कोत्त् रामुण्णि नायर् (एम् आर् नायर्) इत्यस्ति । केरलपत्रिका, सञ्जयन्, विश्वरूपम् इत्येतासां पत्रिकाणां सम्पादकत्वेन सः प्रख्यातः अभवत् । हास्याञ्जलिः, आद्योपहारः, सञ्जयन् (६ भागाः), साहित्यनिकषः इत्येताः अस्य प्रधानकृतयः । कुञ्चन् नम्ब्यार् महाशयस्य अनन्तरं संस्कृतस्यापि साहाय्येन सर्वान् निरन्तरं सः हासयति स्म । त्रिचत्वारिंशदधिकैकोनविंशतिशततमे (१९४३) वर्षे स्वस्य चत्वारिंशे वयसि स हास्यप्रियः हास्यरसिकानां सर्वेषां नेत्राणि अश्रुभिः सम्पूर्य इतः निरगात् ।



**सञ्जयन्**

| | | |
|---|---|---|
| नाम | - | एम् आर् नायर् (माणिक्कोत्त् रामुण्णि नायर्) |
| तूलिकानाम | - | सञ्जयन् |
| जन्म | - | १९०३ जूण् १३ |
| जन्मस्थलम् | - | तलश्शेरि |
| पितरौ | - | माटाविल् कुञ्ञिरामन् वैद्यर् , माणिक्कोत्त् पारु अम्मा । |
| वृत्तिः | - | अध्यापकः, सम्पादकः, हास्यसाहित्यकारः, साहित्यनिरूपकः । |
| प्रधानकृतयः | - | हास्याञ्जलिः, आद्योपहारः, सञ्जयन् (६ भागाः), साहित्यनिकषः । |
| मृत्युः | - | १९४३ सेप्तंबर् १३ |

**पदच्छेदः**

केचिन्मन्यन्ते - केचित् + मन्यन्ते ।
साहित्यविचारेणैव - साहित्यविचारेण + एव ।
आसीदयम् - आसीत् + अयम् ।
अतीवतत्परोऽयम् - आतीवतत्परः + अयम् ।

**विग्रहः**

दुःखभूयिष्ठम् - अतिशयेन बहुः भूयिष्ठम् ,दुःखैः भूयिष्ठम् ।
पुत्रकलत्रयोः - पुत्रः च कलत्रं च पुत्रकलत्रे, तयोः।
आत्मक्लेशम् - आत्मनः क्लेशः आत्मक्लेशः, तम् ।
राजयक्ष्मणा - यक्ष्मणां राजा राजयक्ष्मा, तेन ।

## पठनप्रवर्तनानि



**साहित्यकाराणां तूलिकानामानि कोष्ठकात् विविच्य लिखतु ।**

**( कोविलन्, सञ्जयन्, विलासिनी, मालि, केसरी, उरूब्, सुमङ्गला )**

**उदा -** माणिक्कोत्त् रामुण्णि नायर् - **सञ्जयन् ।**
पि. सि. कुट्टिकृष्णन् - ............................ ।
वेङ्ङयिल् कुञ्ञिरामन् नायनार्- ............................ ।
माधवन् नायर् - ............................ ।
एम्. के. मेनोन् - ............................ ।
वि. वि. अय्यप्पन् - ............................ ।
लीला नम्पूतिरिप्पाट् - ............................ ।

**श्रद्धेयः अंशः**

चयनसामर्थ्यम् ।



**पाठभागं पठित्वा सञ्जयस्य जीवनचरितं लिखतु ।**

श्रद्धेयौ अंशौ

आशयव्यक्तता , भाषाशुद्धिः।



## जीवनचरितरूपरेखां लिखतु ।

### जीवनचरितम् ।

केरलीयहास्यसाहित्यकारेषु अन्यतमोऽस्ति ई. वि. कृष्णप्पिल्ला । अभिनेता, विमर्शकः, अभिभाषकः, सामाजिकः लेखकः इति वैविध्यपूर्णेषु मण्डलेषु स प्रसिद्धः अभवत् । सामाजिकविमर्शनावसरे 'त्रिलोकसञ्चारी' इति तूलिकाभिधा तेन स्वीकृता । सः कोल्लं जिल्लायां शास्तांकोट्टा देशे १८९४ सेप्तम्बर् मासस्य १४ तमे दिने अजायत । कुन्नत्तूर् पप्पु पिल्ला, इञ्चक्काट् वीट्टिल् कल्याणियम्मा च तस्य पितरौ । सीतालक्ष्मी, राजा केशवदासन्, इरविक्कुट्टि पिल्ला, रामराजाभिषेकम्, तिलोत्तमा इत्यादयः अस्य महाशयस्य प्रधानकृतयः भवन्ति । प्रसिद्धः हास्याभिनेता परेतः अटूर् भासिमहाशयः अस्य पुत्रोऽस्ति । १९३८ मार्च् ३० तमे दिने सः निर्यातोऽभवत् ।

### जीवनसूचिका

| | | |
|---|---|---|
| नाम | - | ...................................... । |
| जननम् | - | ...................................... । |
| पितरौ | - | ...................................... । |
| प्रवर्त्तनमण्डलम् | - | ...................................... । |
| तूलिकानाम | - | ...................................... । |
| प्रधानकृतयः | - | ...................................... । |
| मृत्युः | - | ...................................... । |

**श्रद्धेयः अंशः**

आशयावगमनम् ।



## उदाहरणानुसारं संख्याः अक्षररूपेण लिखतु ।

**१९८४ - चतुरशीत्यधिक एकोनविंशति शतम् । /**
**चतुरशीत्यधिक नवशतोत्तरसहस्रम् ।**

१९४७ - ............................................. ।

१९५६ - ........................................ ।

२०१४ - ........................................ ।

२०२५ - ........................................ ।

**श्रद्धेयौ अंशौ**

संख्यायाः स्थानक्रमावबोधः ।

उचितरूपेण परिवर्तनम् ।

**प्रसिद्धानां केषाञ्चन साहित्यकाराणां चित्रं संयोज्य वीडियो/सम्पुटं रचयतु ।**

श्रद्धेयाः अंशाः

उचितानां चित्राणां स्वीकरणम् ।

लघुविवरणम् ।

क्रमीकरणौचित्यम् ।

## क्रियापदपरिचयः

**मन्यन्ते** - मन ज्ञाने आत्मनेपदी लट् प्र.पु.ब.व ।
मन्यते - मन्येते - मन्यन्ते ।

**अकरोत्**- डुकृञ् करणे उभयपदी परस्मैपदे लङ् प्र.पु.ए.व ।
अकरोत् - अकुरुताम् - अकुर्वन् ।

**निनाय** - णीञ् प्रापणे उभयपदी परस्मैपदे लिट् प्र.पु.ए.व ।
निनाय - निन्यतुः - निन्युः ।

**अहसत्** - हस् हसने परस्मैपदी लङ् प्र.पु.ए.व ।
अहसत् - अहसताम् - अहसन् ।

**निरगात्** - निर् उपसर्गपूर्वक इण् गतौ परस्मैपदी लुङ् प्र.पु.ए.व ।
निरगात् - निरगाताम् - निरगुः ।

साहित्यग्रन्थेभ्यः चलचित्रनाटकादिभ्यश्च आकर्षणीयाः हास्यकणिकाः सम्पाद्य संस्कृतभाषया विलिख्य कक्ष्यायां प्रदर्शयतु ।

# शब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अनवद्यम् | निर्दोषम् | കുറ്റമറ്റത് | ದೋಷರಹಿತ | Flawless |
| अरविन्दम् | कमलम् | താമര | ಕಮಲ | The lotus |
| अट्टः | निरीक्षणालयः | കാവൽമാടം | ಕಾವಲುಗೋಪುರ | Watchtower |
| कलत्रम् | पत्नी | ഭാര്യ | ಹೆಂಡತಿ | Wife |
| काञ्चनम् | सुवर्णम् | സ്വർണ്ണം | ಚಿನ್ನ | Gold |
| गर्दभः | खरः | കഴുത | ಕತ್ತೆ | Donkey |
| तदीयः | तस्य अयम् | അവന്റെത് | ಅವನ | His |
| नक्षत्रनाथः | चन्द्रः | ചന്ദ്രൻ | ಚಂದ್ರ | The moon |
| निमग्नः | निष्णातः | മുഴുകിയവൻ | ಮುಳುಗಿದವ | Immersed |
| पतिंवरा | स्वयंवरसन्नद्धा | വധു | ವಧು | Bride |
| प्रख्यातः | प्रसिद्धः | പ്രസിദ്ധൻ | ಪ್ರಸಿದ್ಧ | Famous |
| रजकः | वस्त्रप्रक्षालकः | വസ്ത്രംകഴുകുന്നവൻ | ಅಗಸ | The washer man |
| राजयक्ष्मा | क्षयरोगः | ക്ഷയരോഗം | ಕ್ಷಯರೋಗ | Tuberculosis |
| सहकारः | आम्रवृक्षः | തേൻ മാവ് | ಮಾವಿನ ಮರ | Mango tree |
| स्वसा | सोदरी | സഹോദരി | ಸಹೋದರಿ | Sister |
| सम्पादकः | संशोधकः | എഡിറ്റർ | ಸಂಪಾದಕ | Editor |

# एककम् ३

# नैर्मल्यम्

## आमुखम्

साहित्यकुतुकिनः कलास्वादनेऽपि तत्पराः स्युः। साहित्यसङ्गीतकलाविहीनाः पशुसमानाः इति भर्तृहरिणा उक्तम् । कुसुममिव कला निर्मला भवति। नैर्मल्यं नामके तृतीये एकके भगवदज्जुकम् इति नाटकात् (प्रहसनात्) समाकलितः **भुवि पूर्वं न दृश्यते** इति पाठः, तथा मलबार् प्रदेशेषु प्रख्यातस्य **तेय्यम्** इति कलारूपस्य विवरणात्मकः पाठश्च दत्तः । नैर्मल्यमिति एककस्य पठनेन कलासु प्रतीयमानं नैर्मल्यं पश्यामः।

# षष्ठः पाठः

# भुवि पूर्वं न दृश्यते ।

## पाठप्रवेशः

भगवदज्जुकम्
(प्रहसनम्)
रचना - बोधायनः।

दृश्यकाव्यं रूपकमिति व्यवह्रियते । रूपकाणि नाटकादिभेदेन दश भवन्ति। तेषु अन्यतमं प्रहसनमिति कथ्यते । अमानुषवृत्तीनां कल्पना, अस्पष्टभाषणं, भाषाप्रयोगेषु वैकल्यम् इत्यादीनि हास्यरसप्रधानेषु प्रहसनेषु प्रायेण दृश्यन्ते । संस्कृते महेन्द्रविक्रमस्य मत्तविलासप्रहसनम्, बोधायनस्य भगवदज्जुकं च प्रहसनेषु प्रसिद्धे स्तः। भगवदज्जुकात् समाकलितोऽयं पाठभागः।

## आमुखम्

कथासन्दर्भः।

कस्यचित् परिव्राजकस्य शिष्यो भवति शाण्डिल्यः । भोजनैकप्रियः पठनविमुखः सः बहुवारं गुरुणा सह तर्कयति। विद्वानिति स्वयं मत्वा असाधुभिरेव वाग्भिः जल्पति च। कदाचित् गुरुशिष्यौ कस्मिंश्चित् आरामे उपाविशताम्। तदैव वसन्तसेना चेट्या सह तत्र आगच्छति। सा तु विषसर्पदंशनेन मूर्छति। अत्रान्तरे अन्यस्याः वसन्तसेनाभिधायाः प्राणान् हर्तुमागतः यमकिङ्करः प्रमादेन अस्याः वसन्तसेनायाः प्राणान् अपहरति च। अयमेव कथासन्दर्भः।



(एकं मनोहरमुद्यानम्। उद्यानस्य एकस्मिन् पार्श्वे परिव्राजकेन सह शाण्डिल्यः संवदति। अपरस्मिन् पार्श्वे वसन्तसेना नामिका अज्जुका सख्या सह उद्यानं प्रविशति।)

अज्जुका - (उद्यानसैन्दर्यं वीक्ष्य) अत्र उपविशावः।

मधुकरिका - अज्जुके! अत्र उपविश्य गानमेकम् आलपतु।
(उभे उपविशतः। अज्जुका गायति। उद्यानस्य अपरस्मिन् पार्श्वे-)

शाण्डिल्यः - (कर्णं दत्वा) आहा! पञ्चमनादः, नहि नहि पिकनादः एव। न पुनः किम्? (आलोच्य) मधुरस्वरेण काचित् गायति। सा का इति अन्विष्य आगच्छामि। (गच्छति।) (परितो निरीक्ष्य) हा! उद्यानदेवता इव सर्वाभरणविभूषिता इयं का?
(गगनात् यमकिङ्करः आगच्छति)

यमकिङ्करः - (आत्मगतम्) यस्य आयुषः अन्तम् आगच्छति तस्य जीवापहरणमेव मम धर्मः। वनपर्वतान् अनेकानि राज्यानि च उत्तीर्य अहं मनोवेगेन अत्र आगतःअस्मि। (परितो निरीक्ष्य) सा वसन्तसेना कुत्र? इदानीं तस्याः आयुषः अन्त्यम् आगच्छति। अन्विष्यामि। (परितः ससूक्ष्मं निरीक्ष्य अज्जुकां दृष्ट्वा आत्मगतम्) आहा! इयमेव सा वसन्तसेना। ईषत् निमेषम् अवशिष्यते। तावत् पर्यन्तं विश्रम्य अस्याः प्राणान् अपहरामि।

अज्जुका - (ससंभ्रमम्) सखि! मम पादे कश्चित् दशति वा? हा! सर्पः सर्पः (उच्चैः वदति)

मधुकरिका - (समीपमागत्य दृष्ट्वा) हा। सर्पः, सर्पः। अये! पश्यतु। अज्जुका सर्पदंशनेन परिक्लिन्ना अभवत्।( विलपति)

शाण्डिल्यः - (तत् श्रुत्वा) अविहा। एषा अज्जुका सर्पेण दष्टा।

परिव्राजकः - क्षीणेनास्याः कर्मणा भवितव्यम्।

**स्वकर्म भोक्तुं जायन्ते प्रायेणैव हि जन्तवः।**
**क्षीणे कर्मणि चान्यत्र पुनर्गच्छन्ति देहिनः॥**

अज्जुका - सीदति मे शरीरम्। उद्भवन्ति इव मे प्राणाः। शयितुम् इच्छामि। (मूर्च्छिता)



| | | |
|---|---|---|
| मधुकरिका | - | हा ! हता खलु अज्जुका । |
| यमकिङ्करः | - | (आत्मगतम्) हन्त ! अस्याः प्राणाः मया अपहृताः । अहं चित्रगुप्तसमीपम् एतां नयामि । (यमलोकं प्रतिगच्छति ।) |
| शाण्डिल्यः | - | भगवन् !, परित्यजति एषा प्राणान् । |
| परिव्राजकः | - | अरे मूर्ख ! परमप्रियाः हि प्राणिनां प्राणाः । प्राणैरेव परित्यज्यते शरीरम् इति वक्तव्यम् । |
| शाण्डिल्यः | - | आ । अपेहि ! अकरुण! निःस्नेह! कर्कशहृदय! दुष्टबुद्धे! भिन्नचारित्र! क्रूर! शठ ! मूढ! .. |
| परिव्राजकः | - | किमभिप्रेतं भवता ? |
| शाण्डिल्यः | - | नामाष्टशतं ते पूरयिष्यामि । |
| परिव्राजकः | - | तर्हि छन्दतः। |

शाण्डिल्यः - भो भगवन् ! दुःखितोऽस्मि।

परिव्राजकः - किमर्थम्?

शाण्डिल्यः - एषा अस्माकं स्वजना।

(एवमुक्त्वा शाण्डिल्यः अज्जुकायाः समीपं गच्छति)

परिव्राजकः - कथं ? स्वजनो नाम ? (उत्तरं दातुं शाण्डिल्यः न यतते)

शाण्डिल्यः - हा अज्जुके! हा प्रियसम्पन्ने! हा मधुरगायिनि!

मधुकरिका - (शाण्डिल्यस्य प्रवृत्तिं वीक्ष्य) आर्य! किमिदम्?

शाण्डिल्यः - भवति! स्नेहः।

मधुकरिका - (आत्मगतम्) युज्यते। सर्वानुकम्पी साधुजनो नाम। ( प्रकाशम्) आर्य! मुहूर्त्तम् अज्जुकां परिपालयतु। अहं वैद्यमानयामि।

शाण्डिल्यः - बाढम्। भवति! इदानीं गच्छतु।

मधुकरिका - (आत्मगतम्) सानुक्रोशः एष ब्राह्मणः अज्जुकां क्षणादेव परित्यक्तुं सन्नद्धो न भविष्यति। अतः शीघ्रमेव गच्छामि। ( इति निर्गता)

शाण्डिल्यः - (आत्मगतम्) एषा चेटी गता। अतः स्वैरं रोदामि। (प्रकाशम्) हा अज्जुके! हा मधुरगायिनी!

परिव्राजकः - शाण्डिल्य! , न कर्तव्यमेतत्।

शाण्डिल्यः - आ अपेहि, निःस्नेह! मामपि त्वामिह तर्कयसि।

परिव्राजकः - आगच्छ वत्स, अधीष्व तावत्। ( आलोच्य आत्मगतम्) एषा खलु इदानीं न किञ्चित् जानाति। अस्य मूढस्य प्रत्ययोत्पादनं कर्तुम् अनुयोज्या वेलेयम्। कीदृशो योगः इति प्रदर्शयामि। मृतायाः अस्याः शरीरे अहम् आत्मानं नियोजयामि। (इति विचिन्त्य परिव्राजकः स्वकीयान् प्राणान् अज्जुकायाः देहे नियोजयति)

अज्जुका - (निद्रातः इव उत्थाय) शाण्डिल्य ! शाण्डिल्य !

शाण्डिल्यः - (सहर्षम्) आविहा, जीवति। एषा मधुरगायिनी जीवति। प्रत्यागतप्राणा खल्वेषा। भवति, अयमस्मि।

अज्जुका - अप्रक्षालितपाणिभ्यां मा स्प्राक्षीः।

शाण्डिल्यः - अतिचौक्षिणी खल्वियम्।

| | | |
|---|---|---|
| अज्जुका | - | एहि वत्स! अधीष्व तावत्। |
| | | (तदा मधुकरिका वैद्येन सह प्रविशति) |
| मधुकरिका | - | एतु एतु आर्य। |
| वैद्यः | - | कुत्र सा ? |
| मधुकरिका | - | एषा खलु अज्जुका सत्त्वस्थिता। भुवि पूर्वं न दृश्यते। |
| वैद्यः | - | महान्तं विकारं करोति इयम्। आनय मम सर्वारम्भः। आरभे विषतन्त्रे। (उपविश्य भूमौ मण्डलाकारं रचयित्वा मन्त्रं जपति) कुण्डलकुटिलगामिनि। मण्डलं प्रविश प्रविश। तिष्ठ तिष्ठ। श्रूं श्रूम्। यावत् शिरोवेधं करिष्यामि। कुत्र कुठारिका ? |
| अज्जुका | - | मूर्ख! वैद्य! अलं परिश्रमेण। |
| वैद्यः | - | पित्तमप्यस्ति। तव पित्तं वातं श्लेष्मं च अहं नाशयामि। |



सुन्दरगुलिकाम् आनयामि। (इत्युक्त्वा निष्क्रामति)
( ततः प्रत्यागच्छति परिक्लान्तमुखः यमपुरुषः)

यमकिङ्करः - (आत्मगतम्) इयं सा न। सा वसन्तसेना इयं न। मम प्रमादो अभवत्। अतः यमेन निन्दितोऽस्मि। अतः क्षीणायुषां ताम् अन्यां वसन्तसेनां क्षणमिहानयतु इति यमवचनेन प्रत्यागतोऽहम्। एतस्याः शरीरं यावत् अग्निसंयोगं न स्वीकरोति तावत् एनां सप्राणां करोमि। (आश्चर्येण विलोक्य) अये एषा उत्थिता खलु। सजीवा इयम्। किन्नु खल्विदम्।

अस्याः जीवो मम करे उत्थितैषा वराङ्गना।
आश्चर्यं परमं लोके भुवि पूर्वं न दृश्यते॥

**पदच्छेदः**

| | | |
|---|---|---|
| अचिरादेव | - | अचिरात् + एव। |
| चान्यत्र | - | च + अन्यत्र। |
| प्रायेणैव | - | प्रायेण + एव। |
| पुनर्गच्छन्ति | - | पुनः + गच्छन्ति। |
| क्षणादेव | - | क्षणात् + एव। |
| वेलेयम् | - | वेला + इयम्। |
| उत्थितैषा | - | उत्थिता + एषा। |

**विग्रहः**

| | | |
|---|---|---|
| वनपर्वतान् | - | वनानि च पर्वताश्च वनपर्वताः तान्। |
| जीवापहरणम् | - | जीवस्य अपहरणम्। |
| प्रत्यागतप्राणा | - | प्रत्यागताः प्राणाः यस्याः सा। |
| क्षीणायुषाम् | - | क्षीणम् आयुः यस्याः सा क्षीणायुषा, ताम्। |
| मनोवेगेन | - | मनसः वेगः मनोवेगः, तेन। |
| अतिचौक्षिणी | - | अतिचौक्षम् अस्याः अस्तिति। |

# पठनप्रवर्तनानि



**नाटकं भावानुसारं कक्ष्यायाम् अवतारयतु।**

श्रद्धेयाःअंशाः

आशयावबोधः।
उचितभावः।
उच्चारणशुद्धिः।



**पाठभागात् सम्बोधनपदानि चित्वा लिखतु।**

श्रद्धेयौ अंशौ

सम्बोधनपदानां प्रत्यभिज्ञानम्।

चयनसामर्थ्यम्।



**शाण्डिल्यः इति कथापात्रस्य निरूपणं सूचनानुसारं लिखतु।**

भगवदज्जुकम्, बोधायनः, हास्यकथापात्रम्

विवेकशून्यः, विकलवाक्यप्रयोक्ता



परिहासप्रियः, पठनविमुखः

भोजनप्रियः, निद्रातत्परः

श्रद्धेयाःअंशाः

भाषाशुद्धिः।
वाक्यघटना।
सूचनानां स्वीकारः।

अधिकवाचनांशं पठित्वा पट्टिकां पूरयतु।

| रूपकम् | ग्रन्थः | ग्रन्थकारः |
|---|---|---|
| नाटकम् | अभिज्ञानशाकुन्तलम् | कालिदासः |
| ................. | शृङ्गारभूषणभाणः | वामनभट्टः |
| प्रहसनम् | भगवदज्जुकम् | ................. |
| ................. | मध्यमव्यायोगः | भासः |
| ............ | रुक्मिणीहरणम् | वत्सराजः |
| समवकारः | पञ्चरात्रम् | ............... |
| डिमः | ................... | वत्सराजः |
| प्रकरणम् | मृच्छकटिकम् | ................ |
| अङ्कः | उन्मत्तराघवम् | भास्करः |
| वीथी | .............. | रविपतिः |

**श्रद्धेयः अंशः**

पट्टिकापूरणसामर्थ्यम्।

## क्रियापदपरिचयः

**उपविशामि-** उप + विश् उपवेशने परस्मैपदी लट् उ.पु.ए.व।
उपविशामि- उपविशावः - उपविशामः।

**गायति -** गै गायने परस्मैपदी लट् प्र.पु.ए.व।
गायति - गायतः- गायन्ति।

**अपहरामि -** अप + हृञ् हरणे उभयपदी परस्मैपदे लट् उ.पु.ए.व।
अपहरामि - अपहरावः- अपहरामः।

**परिपालयतु -** परि + पाल रक्षणे परस्मैपदी लोट् प्र.पु.ए.व।
परिपालयतु / परिपालयतात् - परिपालयताम्- परिपालयन्तु।

**रोदिमि -** रुदिर् अश्रुविमोचने परस्मैपदी लट् उ.पु.ए.व
रोदिमि - रुदिवः - रुदिमः।

**अधीष्व -** अधि + इङ् अध्ययने आत्मनेपदी लोट् म.पु.ए.व।
(नित्यम् अधिपूर्वकोऽयं धातुः)
अधीष्व - अधीयाथाम् - अधीध्वम्।

**अस्प्राक्षीः -** स्पृश् संस्पर्शने परस्मैपदी लुङ् म.पु.ए.व।
अस्प्राक्षीः - अस्पृक्षतम् - अस्पृष्ट।

## अधिकवाचनांशः

### अन्वयः

**स्वकर्म भोक्तुं ................पुनर्गच्छन्ति देहिनः ॥**

जन्तवः प्रायेण स्वकर्म भोक्तुम् एव जायन्ते हि कर्मणि क्षीणे सति पुनः देहिनः अन्यत्र गच्छन्ति च।

**अस्याः जीवो ................न दृश्यते ॥**

अस्याः जीवः मम करे (वर्तते) एषा वराङ्गना उत्थिता। एतत् लोके परमम् आश्चर्य (भवति) पूर्वं भुवि न दृश्यते।

### प्रयोगविशेषः

क्षीणेनास्याः कर्मणा भवितव्यम् (भावेप्रयोगः)
अस्याः कर्माणि क्षीणानि भवेयुः (कर्तरि)

### श्रेद्धेयः अंशः

भगवदज्जुकाख्ये प्रहसने शाण्डिल्यस्य भाषाप्रयोगेषु व्याकरणरीत्या अशुद्धान् प्रयोगान् बहुत्र पश्यामः। एवं पाठभागेऽस्मिन् एतादृशाः द्वित्राः प्रयोगाः दृश्यन्ते। तत्पश्यामः

| **पाठस्थं रूपम्** | - | **शुद्धं रूपम्।** |
|---|---|---|
| नामाष्टशतं ते पूरयिष्यामि। | - | नामाष्टोत्तरशतम्। |
| रोदामि | - | रोदिमि। |
| मधुरगायिनी | - | मधुरगायिनि। |

## कोशः

अज्जुका - स्त्रीवेषधारी पुरुषो नाट्योक्तौ गणिकाज्जुका ।

किङ्करः - नियोज्य-किङ्कर-प्रैष्य-भुजिष्य-परिचारकाः।

मूर्खः - अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः।

परिव्राजकः - कर्मन्दी रक्तवसनः परिव्राजकतापसौ ।

अनुक्रोशः - कृपादयानुकम्पास्यादनुक्रोशः।

## व्याकरणविशेषः

**मा स्प्राक्षीः -** अस्प्राक्षीः इति लुङ् रूपम् । माङ् योगे लुङ् लकारः ( माङि. लुङ् ) तथा 'न माङ्योगे' इति अडागमनिषेधश्च ।

## दशरूपकाणां पट्टिका उदाहरणानि च ।

| **रूपकम्** | **ग्रन्थः** | **ग्रन्थकारः** |
|---|---|---|
| नाटकम् | अभिज्ञानशाकुन्तलम् | कालिदासः |
| प्रकरणम् | मृच्छकटिकम् | शूद्रकः |
| भाणः | शृङ्गारभूषणभाणः | वामनभट्टः |
| प्रहसनम् | भगवदज्जुकम् | बोधायनः |
| डिमः | त्रिपुरविजयम् | वत्सराजः |
| व्यायोगः | मध्यमव्यायोगः | भासः |
| समवकारः | पञ्चरात्रम् | भासः |
| वीथी | प्रेमाभिरामः | रविपतिः |
| अङ्कः | उन्मत्तराघवम् | भास्करः |
| ईहामृगः | रुक्मिणीहरणम् | वत्सराजः |

भवतः ग्रामे कस्यचित् कलारूपस्य प्रस्तुतीकरणं भवति । तदर्थम् एकं विज्ञप्तिपत्रं/ पोस्टर् सज्जीकरोतु ।

# सप्तमः पाठः

# तेय्यम्-मनोरञ्जकम्

## पाठप्रवेशः

हास्यरसप्रधानं प्रहसनं नाम दृश्यकलारूपमधिकृत्य वयं पूर्वस्मिन् पाठे पठितवन्तः। युष्माकं प्रदेशेष्वपि नानाविधानि कलारूपाणि द्रष्टुं शक्यन्ते। तेषु कानिचन रङ्गमण्डपेषु अपराणि आराधनालयादिषु अन्यानि कानिचित् चतुष्पथेषु च अवतारयन्ति। एतेषां मध्ये अनुष्ठानकलारूपाणां विशेषतां पश्यामः।

## आमुखम्

दृश्यकला प्रायेण स्थानभेदानुसारं सुकुमारकला अनुष्ठानकला चेति द्विधा भवति। नृत्तं, गीतं, वाद्यम् इत्येतानि तौर्यत्रिकम् इत्युच्यते। तैः साकं चित्रशिल्पादीनि च प्रसिद्धानि भवन्ति। सर्वाण्येतानि सामान्येन सुकुमारकला इति कथ्यते। एतानि यदा आराधनाविधिषु विशेषेण संयोज्यन्ते तदा तानि अनुष्ठानकला इति व्यवह्रियते। सोपानसंङ्गीतम्, तिटम्पुनृत्तम्, कलमेषुत्त् इत्येतानि एवम् अनुष्ठानकलारूपेषु भवन्ति। नृत्त-गीत-वाद्य-चित्रलेखनादीनि सर्वाण्यपि संयोज्य अराधनालयेषु अनुष्ठीयमानं कलारूपं भवति तेय्यम्। मुटियेट्ट्, पटयणि, कलमेषुत्तुपाट्ट् इत्यादिष्वपि नृत्तगीतादीनां प्रयोगाः प्राचुर्येण दृश्यन्ते। अस्मिन् पाठभागे तेय्यमिति कलारूपस्य सामान्यविवरणं प्रदत्तमस्ति।



उत्तरकेरलीयानां परम्परागतम् अनुष्ठानकलारूपं भवति तेय्यम् । पूर्विकाणां वीरपुरुषाणाम् इतिहासपुरुषाणां वा महच्चरितानि अनुस्मर्तुं कलारूपमिदम् आविष्कृतमभवत् । ईश्वरः इत्यर्थे "दैवम्" इति पदं कैरल्यां प्रसिद्धमस्ति । तस्य पदस्य ग्राम्यरूपभेदोऽस्ति 'तेय्यम्' इति । आर्तानां जनानां परिदेवनं श्रुत्वा तान् समाश्वासयितुं भूमावागता देवता अस्ति तेय्यमिति विश्वसन्ति ।

अतिसुन्दरेऽस्मिन् कलारूपे चतुर्विधाभिनयाः सन्ति । रक्तवर्णैः वस्त्रैः, हरिद्रादिभिः कृतैः अङ्गरागैः, पुष्पमालाद्यैः विभूषणैः समलंकृतः देवतावेषधारी वाद्यघोषैः साकं क्षेत्राङ्कणं प्रविश्य नृत्यति । सः नर्तकः 'कोलधारी' इति व्यवह्रियते । नृत्तावसरे चेण्डा, चीनि, तुटि, इलत्तालम्, इत्यादीनि वाद्योपकरणानि वादयन्ति । कोलधारिणः मूर्तिभेदानुसारं चापः, बाणः, दण्डः, खड्गः, चर्म इत्यादीन् आयुधान् धरन्ति ।



अस्य कलारूपस्य शिरोभूषणं "मुटि" इति कथ्यते । मूर्तिभेदानुसारं शिरोऽलङ्कारेषु, मुखालङ्कारेषु, वस्त्रालङ्कारेषु, आभरणेषु तथा नृत्तेष्वपि वैविध्यानि भवन्ति । मनयोला, चायिल्यम्, हरिद्रा, अञ्जनमसी, नालिकेरपत्रम् इत्यादीनि प्रकृतिदत्तानि वस्तूनि अलङ्काराय कल्पन्ते ।



तेय्यरूपेषु तथा आचारेषु अनुष्ठानेषु च वैविध्यं दरीदृश्यते । भद्रकाली, नागभगवती, चामुण्डी, मुच्चिलोट्ट् भगवती इत्येताः मातृदेवताः सन्ति। गुलिकः, विष्णुमूर्तिः, घण्टाकर्णः विषकण्ठः इत्येते बहवः पुरुषमूर्तयश्च विद्यन्ते। तेष्वपि केचन उग्रमूर्तयः अग्निप्रवेशम् आयुधाभ्यासं च कुर्वन्ति । कतिवन्नूर् वीरन्, कण्टनार् केलन् इत्येषां मूर्तीनामनुष्ठानं प्रेक्षकान् विस्मापयति । प्रतिवर्षं निश्चितासु तिथिषु प्रचाल्यमानमिदम् अनुष्ठानकलारुपं सर्वथा सर्वेषाम् आनन्ददायकं भवति ।

**पदच्छेदः**

ग्राम्यरूपभेदोऽस्ति - ग्राम्यरूपभेदः +अस्ति।

अतिसुन्दरेऽस्मिन् - अतिसुन्दरे + अस्मिन्।

भूमावागता - भूमौ + आगता।

**विग्रहः**

शिरोऽलङ्कारः - शिरसः अलङ्कारः।

परम्परागतम् - परम्परया आगतम्।

अनुष्ठानकलारूपम् - अनुष्ठानं च तत् कलारूपं च।

ग्राम्यरूपम् - ग्रामे भवं ग्राम्यम्, ग्राम्यं च तत् रूपं च।

देवतावेषधारी - देवतायाः वेषं धरति यः सः देवतावेषधारी।

क्षेत्राङ्कणम् - क्षेत्रस्य अङ्कणम्।

शिरोभूषणम् - शिरसः भूषणम्।

वैविध्यम् - विविधस्य भावः।

दरीदृश्यते - भृशं पुनः पुनः वा दृश्यते।

## पठनप्रवर्तनानि

**तेय्यम् इति कलारूपे प्रयुक्ताः सङ्केतसंज्ञाः चित्वा पूरयतु।**

**उदा - नृत्तगीतवाद्यम् - तौर्यत्रिकम्।**

दैवम् - .........................

तेय्यवेषधारी - .........................

शिरोऽलङ्कारः - .........................

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम्।

अर्थावगमनम्।

**सूचनानुसारं तेय्यम् इति कलारूपम् अधिकृत्य लघुटिप्पणीं लिखतु ।**

**सूचना -** अनुष्ठानकलारूपं - पूर्विकाणां चरितं - तेय्यम् इति संज्ञा - भक्तानाम् अनुग्रहाय - कोलधारी - वाद्यघोषः - नर्तनम् ।

**श्रद्धेयाः अंशाः**

भाषाशुद्धिः ।

आशयव्यक्तता ।

सर्वासां सूचनानां स्वीकारः।

**तेय्यकलारूपे स्वीकृतानाम् वाद्योपकरणानाम् अलङ्कारवस्तूनां च पट्टिकां लिखतु ।**

| | वाद्योपकरणम् | अलङ्कारवस्तूनि |
|---|---|---|
| उदा- | चेण्टा | हरिद्रा |
| | ................ | ................ |
| | ................ | ................ |

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम् ।

उचितक्रमीकरणम् ।

**केनचिद् कलाकारेण सह कृतम् अभिमुखभाषणं सम्भाव्य लिखतु ।**

छात्रः - भो आचार्य । सुप्रभातम् ।

आचार्यः - सुप्रभातम् । ..................... ।

छात्रः - समीपस्थाद् उच्चविद्यालयात् आगतोऽस्मि ।

आचार्यः - अस्तु । ..................... ।

छात्रः - अनुष्ठानकला नाम का इति ज्ञातुमिच्छामि । तदर्थमागतोऽस्मि।

आचार्यः - वदाम्यहम् । सुकुमारकलारूपाणि

यत्र .....................

छात्रः - द्वित्राणि .....................।

आचार्यः - सोपानसङ्गीतम्, कलमेषुत्त् इत्यादयः।

छात्रः - कृतार्थोऽस्मि। भवते धन्यवादं समर्पयामि।

आचार्यः - ..................... गच्छतु पुनर्दर्शनाय।

**श्रद्धेयौ अंशौ**

उचितपदेन पूरणम्।

आशयावगमनम्।



**विविधानां कलारूपाणां चित्राणि समाहृत्य सम्पुटम् अथवा सद्यप्रदर्शिकां रचयतु।**

**श्रद्धेयाः अंशाः**

चयनसामर्थ्यम्।

आशयव्यक्ततता।

उचितक्रमीकरणम्।

## क्रियापदपरिचयः

**नृत्यति -** नृती गात्रविक्षेपे परस्मैपदी लट् प्र.पु.ए.व।
नृत्यति - नृत्यतः- नृत्यन्ति।

**धरन्ति -** धृञ् धारणे उभयपदी परस्मैपदे लट् प्र.पु.ब.व।
धरति - धरतः - धरन्ति।

**विस्मापयति -** वि+स्मिङ् ईषद् हसने आत्मनेपदी णिचि परस्मैपदे लट् प्र.पु.ए.व।
विस्मापयति - विस्मापयतः - विस्मापयन्ति।

## अधिकविस्तरः

### मुटियेट्ट्

केरलेषु एरणाकुलं, कोट्टयम् , इटुक्कि जिल्लासु प्रचाल्यमानम् अनुष्ठानकलारूपं भवति मुटियेट्ट् । भद्रकाल्या कृतः दारिकवधः अस्य कलारूपस्य इतिवृत्तम्। चालक्कुटिप्पुषा, पेरियार् , मूवाट्टुपुषेत्यादीनां नदीनां तटेषु विद्यमानेषु देवीमन्दिरेषु इतरेषु देवस्थानेषु च कलारूपमिदं प्रचलति । चेण्टा, कुरुंकुषल्, इलत्तालं, कोम्प् इत्यादीनां वाद्यानां घोषेण अर्धरात्रावारभ्य प्रभातपर्यन्तं मुटियेट्ट् अवतारयति।

### पटयणी

दक्षिणकेरलदेशेषु प्रचलितं सर्वजनप्रियं प्राचीनकलारूपं भवति पटयणी । 'भटश्रेणी' इति संस्कृतशब्दात् व्युत्पन्नं भवति पटयणी नाम कैरलीपदमिति मन्यते। दारिकवधानन्तरमपि सक्रोधं तिष्ठन्त्याः देव्याः क्रोधस्य शमनाय परमेश्वरादिभिः देवताभिः भटैस्सह कृतम् आनन्दनर्तनमेव पटयणी इति विश्वसन्ति। भद्रकालीमन्दिरेषु एव कलारूपमिदं प्रचलति। पूर्वं त्रयोदशदिनेषु अनुष्ठिता पटयणी इदानीम् दिनेनैकेन समापयति।

प्रथमं 'काच्चिक्कोट्ट्' इति अनुष्ठानं तप्प् वाद्येन सह क्रियते। तत्तद्देशीयान् जनान् पटयणीसमाचरणम् अधिकृत्य उद्बोधयितुमेव क्रियामिमामाचरति । तदनन्तरं कोलं तुल्लल् आरभते। पूगपत्रेषु विविधानि भीतिदानि रूपाणि विलिख्य तन्मुखपटं धृत्वा नृत्यन्ति । रूपमिदं कोलम् इति उच्यते । यक्षिक्कोलम्, पक्षिक्कोलम्, कालन्कोलम्, पिशाचक्कोलम्, माटन्कोलम्, मरुताक्कोलम्, गन्धर्वन्कोलम् इत्यादीनि बहूनि कोलरूपाणि अस्मिन् कलारूपे दृश्यन्ते । कानिचन कोलानि खड्ग-पाश-दीपशिखादीनि शस्त्राणि धरन्ति। दीपज्वालप्रकाशे रात्रावेव कलेयम् अवतार्यते।

## सब्दकोशः

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अतिचौक्षिणी | अतिमनोहारिणी | മനോഹാരിണി | ಸುಂದರಿ | Beautiful lady |
| अधीष्व | अध्ययनं कुरु | പഠിക്കൂ | ಕಲಿಯಿರಿ | You study |
| उत्तीर्य | तरणं कृत्वा | മറികടന്ന് | ಮೀರಿ | Having passed |
| उत्थाय | उत्थानं कृत्वा | എഴുന്നേറ്റിട്ട് | ಎದ್ದು | Having get up |
| एतु | आगच्छतु | വരൂ | ಬನ್ನಿ | Please come |
| कुठारिका | छेदनोपकरणम् | മഴു | ಕೊಡಲಿ | Axe |
| ख्यातिः | प्रसिद्धिः | പ്രസിദ്ധി | ಪ್ರಸಿದ್ಧಿ | Fame |
| चेटी | दासी | ദാസി | ದಾಸಿ | Maid servant |
| चौक्षम् | मनोहरम् | മനോഹരം | ಸುಂದರ | Beautiful |
| छन्दतः | इच्छानुसारम् | ഇഷ്ടം പോലെ | ಇಷ್ಟವಾದಂತೆ | As desired |
| दष्टम् | दंशनं कृतम् | കടിച്ചു. | ಕಚ್ಚಿದೆ | Bitten |
| नैर्मल्यम् | निर्मलता | ശുദ്ധം | ಶುದ್ಧ | Purity |
| परिक्लिन्ना | क्षीणा | ക്ഷീണിച്ചവൾ | ಆಯಾಸಗೊಂ- ಡವಳು | Tired woman |
| परिव्राजकः | अवधूतः | സംന്യാസി | ಸನ್ಯಾಸಿ | Saint |
| प्रत्ययः | विश्वासः | വിശ്വാസം | ವಿಶ್ವಾಸ | Faith |
| बाढम् | सत्यम्/ अतिशयः | നല്ലത് | ಹೌದು | Yes it is |
| सर्वारम्भः | उपकरण सम्भारः | ഔഷധപ്പെട്ടി | ಔಷಧಿಯ ಪೆಟ್ಟಿಗೆ | Medicine box |
| सानुक्रोशः | सकरुणः | കരുണയോടെ | ಕರುಣೆಯಿಂದ | Compassionate |
| सीदति | कम्पते | വിറയ്ക്കുന്നു | ನಡುಗುತ್ತದೆ | Shivering |

गुणपाठप्रतिपादिकाः कथाः संपाद्य संस्कृतभाषया लिखतु।

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| लघूपन्यासं लिखति । | | | |
| सम्भाषणांशान् पूरयति । | | | |
| नाटकम् अवतारयति । | | | |
| कथापात्रनिरूपणं लिखति । | | | |
| रूपकाणां पट्टिकां पूरयति । | | | |
| कलारूपाणां सम्पुटम् रचयति । | | | |

# एककम् ४

# मार्दवम्

## आमुखम्

युक्तिचिन्ता नराणां सामाजिकजीवने अत्यन्तापेक्षिता खलु । शास्त्रज्ञानेन लौकिकन्यायानां प्रयोगेण च अस्मासु युक्तिबोधः प्रवर्धते । मनः कुसुमवत् मृदुः निर्मलं च स्यात् । तदात्वे एव युक्तिचिन्ता प्रवर्धते । 'मार्दवम्' नामके अस्मिन् एकके त्रयः पाठाः सन्ति । **कुरु सिंहावलोकनम्** इति लौकिकन्यायात्मिका कथा, **द्रष्टव्यं शास्त्रचक्षुषा** इति सुभाषितपाठः, **शिक्षानुशासनम्** इति सम्भाषणपाठश्च। युक्तिचिन्तया शास्त्रीयवीक्षणेन च अग्रे गच्छामः।

# अष्टमः पाठः

# कुरु सिंहावलोकनम्

## पाठप्रवेशः

वर्णनाप्रधानासु साहित्यरचनासु तत्र तत्र अतिशयोक्तयः दृश्यन्ते । या वर्णना वास्तविकताम् अतिक्रम्य चमत्कारपूर्णतया लसति सैव अतिशयोक्तिः। अतिशयोक्तिसमृद्धानि द्वित्राणि वाक्यानि सम्भाव्य वदन्तु ।

## आमुखम्

विश्वासप्रमाणमधिकृत्य प्रचलिता भवति अनुष्ठानकला इति पूर्वस्मिन् पाठे वयं पठितवन्तः । लोकोक्तिम् अनुसृत्य स्वानुभवं च आधारीकृत्य भवति लौकिकन्यायः। विशालान् आशयान् संक्षिप्ततया युक्त्यनुसारं च वक्तुम् अनेन शक्यते । सहस्राधिकाः लौकिकन्यायाः संस्कृतवाङ्मये सन्ति । तेभ्यः चतुरः न्यायान् आख्यानरूपेण अत्र प्रतिपादयति ।

कश्चिद् बालकः पठनात् विमुखस्सन् भोजनं, क्रीडनं, शयनं च कृत्वा अलसतया दिनानि नयति स्म । अतः तस्य माता अतीव दुःखिता अभवत् । सा तस्य अध्यापकमुपगम्य सर्वमपि वृत्तान्तं तस्मै न्यवेदयच्च।




अध्यापकः अवदत् –" बालोऽयं पठने विमुखः इति जानामि। तस्मै कथा एव रोचते। अतः इदानीं **गुडगुलिकान्यायेन** एव तमहं पाठयामि । तिक्तरसां गुलिकां शर्करया सह ददाति चेत् शिशवः खादेयुः । तथा विविधरसयुक्ताभिः कथाभिः सह गुणपाठान् तम् उपदिशामि" इति।

एवं बहुभिः गुणपाठकथाभिः तस्य आलस्यम् अध्यापकः क्रमेण दूरीचकार ।



तदनु स शिष्यः पठनतत्परः सन् विविधानि पुस्तकानि पठितुमारभत । एकदा तस्य वाचनतात्पर्यं समीक्ष्य अध्यापकः तम् अवदत्। "वत्स! किं पठनीयम् इति विषये चिन्तया अलम् । समस्तमपि पठितव्यं भवति । तथापि **नीरक्षीरन्यायेन** यदवश्यं युक्तियुक्तं च तदेव स्वीकरणीयम् । हंसः नीरमिश्रितात् क्षीरात् क्षीरमेव स्वीकरोति इति प्रसिद्धिरस्ति। तद्वत् सारं स्वीकरोतु। निस्सारं सर्वं त्यजतु" इति।

एवं त्याज्यग्राह्यविवेचनधिया स अनेकान् ग्रन्थान् पठित्वा क्रमेण **सोपानारोहणन्यायेन** एकैकां कक्षाम् उत्तीर्य उन्नतं विजयं प्राप्तवान्।

विजयिनं तम् अनुमोदयितुम् एकदा विद्यालये समादरणसभा समायोजिता । "प्रासादमारोढुमिच्छुः क्रमशः सोपानमारुह्य यथा लक्ष्यं प्राप्नोति तथा एव विजयिनः अस्य लक्ष्यप्राप्तिः" इति प्रथमाध्यापकः अनुमोदनसमये अवदच्च। गुरुवचनं श्रुत्वा सन्तुष्टः स तु

**सिंहावलोकनन्यायेन** आत्मनः चरितं सर्वमपि पुनरवालोकयत्। तदनु स्वयमेवमुक्तवान् -

गच्छन् पिपीलको याति
योजनानां शतान्यपि ।
अगच्छन् वैनतेयोऽपि
पदमेकं न गच्छति ।।






**पदच्छेदः**

विमुखस्सन् - विमुखः+ सन्।
न्यवेदयच्च - न्यवेदयत् + च।
बालोऽयं - बालः +अयम्।
प्रसिद्धिरस्ति - प्रसिद्धिः + अस्ति।

| | | |
|---|---|---|
| यदवश्यम् | - | यत्+ अवश्यम्। |
| तदेव | - | तत् +एव। |
| पुनरवालोकयत् | - | पुनः+ अवालोकयत्। |
| शतान्यपि | - | शतानि+ अपि। |
| वैनतेयोऽपि | - | वैनतेयः+ अपि। |

**विग्रहः**

| | | |
|---|---|---|
| गुडगुलिकान्यायेन | - | गुडः च गुलिका च गुडगुलिके ते अधिकृत्य कृतः न्यायः, तेन। |
| नीरक्षीरन्यायेन | - | नीरं च क्षीरं च नीरक्षीरे , ते अधिकृत्य कृतः न्यायः, तेन। |
| सिंहावलोकनन्यायेन | - | सिंहस्य अवलोकनं सिहावलोकनम्, तदधिकृत्य कृतः न्यायः, तेन। |
| निःसारम् | - | निर्गतः सारः यस्मात् तत्। |
| वैनतेयः | - | विनतायाः अपत्यं पुमान्। |

## पठनप्रवर्तनानि



**आशयं पठित्वा अत्र उचितः न्यायः कः इति लिखतु।**

**क)** वस्त्रापणं गत्वा रीना विविधेभ्यः वस्त्रेभ्यः उचितं वस्त्रं क्रीणाति।

**ख)** शताभिषिक्तः पितामहः एकान्ते स्वस्य जीवनम् अनुस्मरति।

**ग)** कश्चित् दरिद्रः युवा कठिनेन परिश्रमेण क्रमेण आपणावलिं स्थापयामास।

**घ)** न्यायाधिपेन दण्डितः चोरः कारागारे स्थित्वा स्वापराधान् अचिन्तयत्।

**ङ)** अध्यापकः चलच्चित्रगानं श्रावयित्वा विविधान् अलङ्कारान् पाठयति।

**श्रद्धेयौ अंशौ**

आशयावगमनम्।

उचितस्य न्यायस्य चयनम्।

**लौकिकन्यायानां सम्पुटं निर्मातु ।**

**श्रद्धेयौ अंशौ**

उचितस्य न्यायस्य चयनम् ।
आशयानुसारं क्रमीकरणम् ।

**न्यायप्रतिपादकं लघुविवरणं / वाक्यं वा लिखतु / सञ्चिनोतु ।**

**श्रद्धेयाः अंशाः**

उचितवाक्यघटना ।
भाषाशैली ।

उचितस्य न्यायस्य प्रयोगः ।

**प्रयोगविशेषं ज्ञात्वा वाक्यं परिवर्तयतु ।**

**उदा-** <u>**बालकः**</u> कथा रोचते । <u>**बालकाय**</u> कथा रोचते ।

<u>**सीता**</u> लड्डुकं रोचते । <u>**सीतायै**</u> लड्डुकं रोचते ।

**क)** भ्रमरः मधु रोचते ।

**ख)** रमा फलरसं रोचते ।

**ग)** राजीवः क्रीडा रोचते ।

**घ)** अनुजा चोकलेहः रोचते ।

**श्रद्धेयौ अंशौ**

विभक्तिबोधः ।

वाक्यस्य साधुता ।

**कथां प्रादेशिकभाषया परिवर्त्य लिखतु ।**

**श्रद्धेयौ अंशौ**

भाषाशैली ।

सम्पूर्णस्य आशयस्य स्वीकारः।

**आधुनिकेषु वार्तामाध्यमेषु विभिन्नप्रकाराः वार्ताः अनुदिनं दृश्यन्ते । तासु विविच्य उचिताः स्वीकरणीयाः खलु । तर्हि तत्र कः न्यायः योजनीयः? सत्यासत्यविवेचनमधिकृत्य चर्चां च करोतु ।**

**श्रद्धेयाः अंशाः**

उचितचयनम्।
आशयावगमः।
उचितस्य न्यायस्य प्रयोगः।

## क्रियापदपरिचयः

**खादेयुः -** खादृ भक्षणे परस्मैपदी विधिलिङ् प्र.पु.ब.व।
खादेत् -खादेताम् - खादेयुः।

**आरभत -** आङ् उपसर्गपूर्वक रभ्- राभस्ये आत्मनेपदी लङ् प्र.पु.ए.व।
आरभत - आरभेताम् - आरभन्त।

**त्यजतु -** त्यज हानौ परस्मैपदी लोट् प्र.पु.ए.व।
त्यजतु/त्यजतात् - त्यजताम् - त्यजन्तु।

सुग्रीवाज्ञा, भगीरथप्रयत्नम् इत्यादीनां भाषाशैलीनां समाहरणम् अवतारणं च करोतु।

# नवमः पाठः

# द्रष्टव्यं शास्त्रचक्षुषा

## पाठप्रवेशः

स्वयमेव सम्पूर्णं विशिष्टाशयसन्पन्नं तथा भावस्य विचारस्य धर्मस्य सत्यस्य औचित्यबोधस्य युक्तिचिन्तायाः च प्रतिपादकं पद्यमेव सुभाषितम् इति कथ्यते। अनेकानि सुभाषितानि अज्ञातकर्तृकाणि भवन्ति। व्यासभासकालिदासादीनां कृतिभ्यः स्वीकृतानि बहूनि सुभाषितानि प्रथितानि। सुभाषितत्रिशती, सुभाषितरत्नभण्डागारः, सुभाषितावली, सुभाषितनीवी इत्यादयः पूर्णतया सुभाषितग्रन्थाः भवन्ति।

## आमुखम्

समस्तमपि कार्यं शास्त्रदृष्ट्या तथा स्वमेधया विवेकेन च विचिन्त्य एव करणीयम्। युक्तिचिन्तां विना कृतं कार्यं निरर्थकं भविष्यति। कालिदासमहाकविना एवमुक्तम् – “प्रायेण सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः” इति। एतादृशानि आशयप्रतिपादकानि चत्वारि सुभाषितानि अत्र पठामः।

विचारेण विना कृतं कर्म आपदां कारणं भवति।




**विग्रहः**

| | | |
|---|---|---|
| अविवेकः | - | न विवेकः। |
| विमृश्यकारिणम् | - | विमर्शं करोति यः सःविमृश्यकारी, तम्। |
| गुणलुब्धाः | - | गुणैः लुब्धाः। |

| अन्वयः | | अन्वयार्थः |
|---|---|---|
| सहसा | - | विचिन्तनं विना |
| क्रियाम् | - | प्रवृत्तिम् |
| न विदधीत | - | न कुर्वीत |
| गुणलुब्धाः | - | गुणाभिलाषुकाः |
| सम्पदः | - | श्रियः |
| विमृश्यकारिणं | - | विचारशीलं पुरुषम् |
| स्वयमेव | - | परप्रेरणां विना |
| वृणुते हि। | - | स्वीकरोति खलु। |

**भावार्थः**

विचिन्तनं विना किमपि कार्यं न कर्तव्यम्। यतः विवेकराहित्यं बहूनां दोषाणां निदानं भवति। यः सम्यक् विचिन्त्य कार्यं करोति तं जनं गुणभिलाषुकाः सम्पदः स्वयमेव प्राप्नुवन्ति।

धनिकत्वं दरिद्रत्वं च अभिलाषानुसारं भवति।



## सुभाषितत्रिशती

**वयमिह परितुष्टाः वल्कलैस्त्वं दुकूलैः**
**सम इह परितोषो निर्विशेषो विशेषः।**
**स तु भवति दरिद्रो यस्य तृष्णा विशाला**
**मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥**

**पदच्छेदः**

| | | |
|---|---|---|
| वल्कलैस्त्वं | - | वल्कलैः + त्वम्। |
| सम इह | - | समः + इह। |
| दरिद्रो यस्य | - | दरिद्रः+ यस्य। |
| कोऽर्थवान् | - | कः + अर्थवान्। |
| को दरिद्रः | - | कः + दरिद्रः। |



**विग्रहः**

| | | |
|---|---|---|
| निर्विशेषः | - | निर्गतो विशेषः। |
| अर्थवान् | - | अर्थः अस्य अस्ति इति अर्थवान्। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| इह | - | अत्र |
| वयम् | - | अस्मादृशाः जनाः |

| | | |
|---|---|---|
| वल्कलैः | - | वृक्षत्वग्भिः |
| परितुष्टाः | - | सन्तुष्टाः भवन्ति। |
| त्वं | - | युष्मत्सदृशःजनः |
| दुकूलैः च | - | पट्टाम्बरैः च। |
| इह | - | अत्र (आवयोः विषये) |
| परितोषः | - | सन्तोषः |
| समः | - | तुल्यः एव। |
| विशेषः, निर्विशेषः | - | प्रत्येकं वक्तुं विशेषो नास्ति एव। |
| यस्य | - | यस्य नरस्य |
| तृष्णा | - | अभिलाषः |
| विशाला | - | अतिविस्तृतः |
| स तु | - | स नरस्तु |
| दरिद्रः भवति | - | निस्वः भवति। |
| मनसि | - | चिन्तायां |
| परितुष्टे | - | सन्तृप्तायां सत्यां |
| कः अर्थवान् ? | - | कः सम्पन्नः? (भवति) |
| कः दरिद्रः ? | - | कः निस्वः च? (भवति) |

**भावार्थः**

अस्मिन् स्थाने (वनप्रदेशे) अस्मादृशो जनः केवलं वल्कलेनापि परितुष्टः भवति। युष्मत्सदृशः दुकूलादिभिः वस्त्रैश्च तत्रापि सन्तुष्टः भवति। आवयोः परितोषः समान एव। विशेषेण वक्तुम् अत्र किमपि नास्त्येव। यस्य अभिलाषः अतिविस्तृतः भवति स एव दरिद्रः। मनसि सन्तुष्टे सति धनिकत्वं नाम न। दरिद्रता अपि न।

विचिन्त्य एव गुणदोषविवेचनं करणीयम्।




**पदच्छेदः**

| | | |
|---|---|---|
| इत्येव | - | इति + एव। |
| चापि | - | च + अपि। |
| इत्यवद्यम् | - | इति +अवद्यम्। |
| परीक्ष्यान्यतरद्भजन्ते | - | परीक्ष्य +अन्यतरत् +भजन्ते। |

**विग्रहः**

| | | |
|---|---|---|
| परप्रत्ययनेयबुद्धिः | - | परेषां प्रत्ययः परप्रत्ययः, तेन नेया बुद्धिः यस्य सः। |

| **अन्वयः** | | **अन्वयार्थः** |
|---|---|---|
| पुराणं | - | पुरातनम् |
| इति एव | - | इति हेतुना एव |
| सर्वं | - | समस्तं |
| साधु न | - | निर्दोषं न। |
| नवम् इति | - | नूतनम् इत्यतः |
| काव्यम् | - | काव्यसाहित्यम् |
| न च अवद्यम् | - | दोषयुक्तं च न भवति। |
| सन्तः | - | विद्वज्जनाः |

| | | |
|---|---|---|
| परीक्ष्य | - | युक्तायुक्तविवेचनं कृत्वा |
| अन्यतरत् | - | द्वयोः एकम् |
| भजन्ते | - | स्वीकुर्वन्ति। |
| मूढः | - | अनभिज्ञः |
| परप्रत्ययनेयबुद्धिः (भवति) | - | अन्याभिमतेन प्रवर्तमानः भवति। |

**भावार्थः**

प्राचीनमिति कारणेनैव सर्वमपि काव्यं निर्दोषं न भवति। तथा नूतनमिति हेतुना सकलमपि काव्यं दोषयुक्तं च न। विद्वज्जनाः सम्यक् परीक्ष्य द्वाभ्यां गुणयुक्तम् एकं स्वीकुर्वन्ति। अज्ञस्तु गुणदोषविवेचनं कर्तुम् असमर्थः सन् अन्येषाम् अभिमतानुसारं प्रवर्तते।

**स्वप्रयत्नेन किं सत्यम् इति ज्ञात्वा तदेव स्वीकरणीयम्।**




**पदच्छेदः**

| | | |
|---|---|---|
| यदस्ति | - | यत् + अस्ति। |
| नास्तीति | - | न+ अस्ति + इति। |

| | | |
|---|---|---|
| वाक्यैर्न | - | वाक्यैः + न। |
| ममात्र | - | मम + अत्र। |
| यदत्र | - | यत् + अत्र। |

**अन्वयः** **अन्वयार्थः**

| | | |
|---|---|---|
| यत् अस्ति | - | यत् विद्यते |
| यत् न अस्ति | - | यत् न विद्यते |
| इति एषः यः संशयः | - | इति अयं यः सन्देहः अस्ति |
| अत्र | - | अस्मिन् विषये |
| परस्य | - | अन्यस्य |
| वाक्यैः | - | वचनैः |
| मम | - | अस्मादृशानाम् |
| न निश्चयः | - | निर्णयः नास्ति एव। |
| तपसा | - | कठिनप्रयत्नेन |
| शमेन च | - | मनोनियन्त्रणेन |
| तत्त्वम् अवेत्य | - | सत्यम् अवगम्य |
| यद् अत्र निश्चितम् | - | यत् (सत्यम्) अत्र निर्णीतम् |
| (तत्) स्वयं | - | तदेव स्वयं |
| ग्रहिष्यामि | - | स्वीकरिष्यामि। |

**भावार्थः**

यत् अस्ति यत् नास्ति इति विषये मम सन्देहोऽस्ति। तथापि अन्यस्य जनस्य वचने मम विश्वासो नास्ति एव। प्रयत्नेन मनोनियन्त्रणेन च स्वयमेव तथ्यं ज्ञात्वा तदेव स्वीकरिष्यामि।

# पठनप्रवर्तनानि



**श्लोकान् सतालमालपतु ।**

**श्रद्धेयाः अंशाः**

अवतरणशैली ।
आशयावबोधः ।
उच्चारणस्फुटता ।



**श्लोकानाम् अन्वयं/गद्यक्रमं लिखतु ।**

**श्रद्धेयाः अंशाः**

विशेषणविशेष्यादीनां ज्ञानम्
विभक्तिबोधः ।
वाक्यघटना ।



**श्लोकानाम् आशयं स्ववाक्यैः लिखतु ।**

**श्रद्धेयाः अंशाः**

भाषाशुद्धिः ।
आशयावबोधः।
वाक्यघटना ।



**इष्टतमस्य श्लोकस्य आस्वदनटिप्पणीं लिखतु ।**

**श्रद्धेयाः अंशाः**

टिप्पणीघटना ।
भाषाशुद्धिः ।
आशयवबोधः ।



**जीवने विजयप्रचोदकानां सुभाषितानां सम्पुटं निर्मातु ।**

**श्रद्धेयाः अंशाः**

चयनसामर्थ्यम् ।
युक्तायुक्तचिन्ता ।
क्रमीकरणसामर्थ्यम् ।

## क्रियापदपरिचयः

**विदधीत -** वि पूर्वक डुधाञ् धारणपोषणयोः उभयपदी धातोः आत्मनेपदे विधिलिङ् प्र.पु.ए.व। विदधीत - विधदीयाताम् - विदधीरन्।

**वृणुते -** वृञ् वरणे उभयपदी धातोः आत्मनेपदे लट् प्र.पु.ए.व।
वृणुते - वृण्वाते - वृण्वते।

**भजन्ते -** भज सेवायाम् आत्मनेपदी लट् प्र.पु.ब.व।
भजते - भजेते - भजन्ते।

**ग्रहिष्यामि -** ग्रह उपादाने परस्मैपदी लृट् उ.पु.ए.व।
ग्रहिष्यामि - ग्रहिष्यावः - ग्रहिष्यामः।

ध्येयवाक्यानि, सूक्तानि च समाहृत्य कक्ष्यायामवतारयतु।

# दशमः पाठः

# शिक्षानुशासनम् ।

## पाठप्रवेशः

'सत्यमेव जयते', 'अहं ब्रह्मास्मि', 'तत्त्वमसि' इत्यादीनि सूक्तानि भवन्तः पूर्वं श्रुतवन्तः किल ? एतानि सूक्तानि अस्मत्संस्कृतेः दिशासूचकानि भवन्ति। वाक्यानीमानि उपनिषत्सु वर्तन्ते। विविधानां संस्थानां ध्येयवाक्यत्वेन स्वीकृतानि इमानि। प्रसिद्धाः काश्चन अन्याः सूक्तीः परिचिनुमः।

## आमुखम्

संस्कृतसाहित्यं वैदिकं लौकिकं चेति द्विविधं भवति। लौकिकसाहित्ये महाकाव्यनाटकादीनि प्रसिद्धानि भवन्ति। वैदिकसाहित्ये वेदाः वेदाङ्गानि उपनिषदः च प्रसिद्धानि। महाकाव्येभ्यः स्वीकृतानि कानिचन सुभाषितानि पूर्वस्मिन् पाठे पठितवन्तः। इदानीं वेदानाम् अन्तः इत्यर्थे वेदान्त इति प्रसिद्धाम् उपनिषदं परिचिनुमः। ईशम्, केनम्, कठम्, प्रश्नम्, मुण्डकम्, माण्डूक्यम्, तैत्तिरीयम्, ऐतरेयम्, छान्दोग्यम्, बृहदारण्यकम् च प्रसिद्धाः दशोपनिषदः। पूर्विकाणाम् ऋषिवर्याणां दर्शनान्येव उपनिषत्सु प्रतिपादितो विषयः। तैत्तिरीयोपनिषदः शिक्षावल्लीतः कश्चन अंशः पाठभागत्वेन स्वीकृतः।



**गुरुकुले वसन् शिष्यः विद्याभ्यासं परिसमाप्य गुरुदक्षिणां दातुकामः आचार्यमुपगम्य अवदत्।**

शिष्यः - भोः आचार्य! अभिवादये। ममाध्ययनं समाप्तम् इति भवता उक्तम्। अतः गृहं गन्तुकामोऽहं भवते दक्षिणां प्रदातुमिच्छामि।

आचार्यः - वत्स! दीर्घायुर्भव। भवादृशानां शिष्याणां स्नेहः एव अस्मादृशानाम् आचार्याणां दक्षिणा।

शिष्यः - एवं चेत् मया किं करणीयम् इति उपदिशतु।

आचार्यः - शिष्य ! त्वं सर्वदा **सत्यं वद। धर्मं चर।** त्वया **स्वाध्यायान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्।**

शिष्यः - अस्तु अहं मातापितरौ द्रष्टुं त्वरयामि।

आचार्यः - भवतु वत्स ! त्वं **मातृदेवो भव। पितृदेवो भव।** अपि च **आचार्यदेवो भव। अतिथिदेवो भव।**

शिष्यः - बाढम् । अहमाचार्यं यथातथमनुतिष्ठामि ।

आचार्यः - मैवम् । **यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि ।**

शिष्यः - मया आर्जितानि सर्वाणि इतरेभ्यः दातुमिच्छामि ।

आचार्यः - वत्स! यत् ददासि तत् **श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम्।**

शिष्यः - अस्तु । इतःपरं विचिकित्सा भविष्यति चेत् कथं परिहार्यम् ?

आचार्यः - संशयश्चेत् निस्वार्थिनं शमधनयुक्तम् आचार्यमुपगम्य संशयनिवृत्तिं कुरु । **एष आदेशः। एष उपदेशः। एतदनुशासनम् ।** शुभास्ते सन्तु पन्थानः।।

## पदच्छेदः

| | | |
|---|---|---|
| दीर्घायुर्भव | - | दीर्घायुः + भव । |
| धर्मान्न | - | धर्मात् + न । |
| त्वयोपास्यानि | - | त्वया+ उपास्यानि । |
| यान्यस्माकं | - | यानि + अस्माकम् । |
| यान्यनवद्यानि | - | यानि+ अनवद्यानि । |
| वाक्यानीमानि | - | वाक्यानि + इमानि। |
| गन्तुकामोऽहम् | - | गन्तुकामः + अहम् । |
| संशयश्चेत् | - | संशयः + चेत् । |
| शुभास्ते | - | शुभाः + ते । |
| ममाध्ययनम् | - | मम + अध्ययनम् । |
| अश्रद्धयाऽदेयम् | - | अश्रद्धया + अदेयम् । |

**विग्रहः**

| | | |
|---|---|---|
| आचार्यः | - | आचारं ग्राहयति इति आचार्यः । |
| मातापितरौ | - | माता च पिता च । |
| मातृदेवः | - | माता देवो यस्य सः । (एवं पितृदेवः, आचार्यदेवः, अतिथिदेवः।) |
| लौकिकम् | - | लोके विदितम् । (लोके भवम्) |
| वैदिकम् | - | वेदे विदितम् । (वेदे भवम्) |
| निस्स्वार्थम् | - | स्वस्मै अर्थं स्वार्थम्, निर्गतं स्वार्थं यस्मात् सः निस्स्वार्थः तम् । |

## पठनप्रवर्तनानि



**पाठभागस्थम् आचार्यशिष्ययोः संभाषणं भावानुसारम् अवतारयतु ।**

**श्रद्धेयाः अंशाः**

प्रश्नवाचकशब्दानां प्रयोगः ।

अवतरणशैली ।

भावानुसारम् अवतारणम् ।



**उदाहरणानुसारं क्रियापदं परिवर्त्य लिखतु ।**

उदा – <u>**भवान्**</u> सत्यं वदतु ।

<u>**त्वं**</u> सत्यं वद ।

क) भवान् धर्मं चरतु ।

ख) भवान् आयुष्मान् भवतु ।

ग) भवान् सम्यक् पठतु

**श्रद्धेयौ अंशौ**

उचितक्रियापदस्य स्वीकरणम् ।

वाक्यशुद्धिः।

## विविधानां संस्थानां तेषां ध्येयवाक्यानां च पट्टिकां करोतु।

| **ध्येवाक्यम्** | | **संस्था** |
|---|---|---|
| योगक्षेमं वहाम्यहम् | - | एल्. ऐ. सि । |
| ........................ | - | ............................... । |
| ........................ | - | ............................... । |
| ........................ | - | ............................... । |
| ........................ | - | ............................... । |

**श्रद्धेयौ अंशौ**

चयनसामर्थ्यम्।

पट्टिकाकरणम्।

## सूचनानुसारं लघूपन्यासं लिखतु।

**सूचना – वैदिकसाहित्यं – वेद-वेदाङ्गानि- उपनिषदः- संस्कृतेः सूचकानि- ध्येयवाक्यानि।**

**श्रद्धेयाः अंशाः**

सर्वेषां सूचकानां स्वीकारः।

भाषाशुद्धिः।

उपन्यासघटना।



**वेदाः- वेदाङ्गानि – उपनिषदः पट्टिकारूपेण लिखतु ।**

ऋक्, प्रश्नम्, साम, शिक्षा, कल्पम्, कठम्, व्याकरणम्, बृहदारण्यकम् निरुक्तम्, ज्योतिषम्, ईशम्, अथर्वः, केनम्, मुण्डकम्, माण्डूक्यम्, यजुः, तैत्तिरीयम्, छन्दः, ऐतरेयम्, छान्दोग्यम् ।

| वेदाः | वेदाङ्गानि | उपनिषदः |
| --- | --- | --- |
| | | |

**श्रद्धेयः अंशः**

पट्टिकाकरणसामर्थ्यम् ।

## अधिकविस्तरः

**मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव ।** - माता, पिता, आचार्यः,अतिथिश्च एते देवतावदुपास्याः इत्यर्थः।

**यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि -** अस्माकम् आचार्याणां शोभनचरितानि आम्नायाद्यविरुद्धानि यानि कर्मणि तानि एव त्वया नियमेन कर्तव्यानि-इत्याशयः।

**यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि ।-** अनिन्दितानि शिष्टाचारलक्षणानि कर्माणि कर्तव्यानि अवद्यानि इतराणि न कर्तव्यानि ।

**श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् ।** - यत् किञ्चित् दातव्यं तत् श्रद्धया दातव्यम् , अश्रद्धया न दातव्यम् । श्रिया- विभूत्या दातव्यम् - अधिकं दातुं नास्तीत्यतः लज्जया देयम् । न्यूनं जातं वा इति भीत्या देयम् । संविदा देयम्- मैत्र्यादिकार्येण सम्भाषया देयम् ।

### कर्तरि - कर्मणि प्रयोगौ

मया किं करणीयम् । - कर्तरि ।

अहं किं करवाणी । - कर्मणि ।

# शब्दकोशः।

| संस्कृतम् | संस्कृतम् | कैरली | कन्नडा | आङ्गलम् |
|---|---|---|---|---|
| अवद्यम् | दोषयुक्तम् | ദോഷത്തോട് കൂടിയത് | ದೋಷವಿರುವ | Infallible |
| आलस्यम् | तन्द्रा | മടി | ಉದಾಸೀನ | Laziness |
| तपः | तीव्रयत्नः | കഠിനപ്രയത്നം | ಕಠಿಣ ಯತ್ನ | Intense effort |
| तिक्तरसः | रसविशेषः | കയ്പ് രസം | ಕಹಿರಸ | Bitter |
| तृष्णा | अभिलाषः | ആഗ്രഹം | ಆಸೆ | Desire |
| दुकूलम् | कौशेयम् | പട്ടുവസ്ത്രം | ರೇಷ್ಮೆ ಉಡುಗೆ | Silk |
| निस्सारम् | साररहितम् | കഴമ്പില്ലാത്ത | ರಸವಿಲ್ಲದ | Trivial |
| परः | अन्यः | മറ്റൊരാൾ | ಇನ್ನೊಬ್ಬ | Another |
| पिपीलकः | पीलकः | ഉറുമ്പ് | ಇರುವೆ | Ant |
| पुराणम् | प्राचीनम् | പഴയത് | ಹಳೆಯದು | Old |
| मूढः | अज्ञः | അറിവില്ലാത്തവൻ | ಮೂರ್ಖ | The fool |
| लुब्धः | अभिलाषयुक्तः | കൊതിയുള്ളവൻ | ಅತಿಯಾಸೆ ಇರುವವನು | Greedy |
| वल्कलः | वृक्षत्वक् | മരവുരി | ಮರದ ತೊಗಟೆ | Tree bark |
| विचिकित्सा | सन्देहः | സംശയം | ಸಂದೇಹ | Doubt |
| विमुखः | विरतः | പിന്തിരിഞ്ഞവൻ | ವಿಮುಖ | Averse |
| वैनतेयः | गरुडः | ഗരുഡൻ | ಗರುಡ | The Garuda |
| शमः | विकारराहित्यम् | നിർവ്വികാരത | ವಿಕಾರವಿಲ್ಲದ ಅವಸ್ಥೆ | Insensitivity |
| संवित् | सम्भाषा | സംഭാഷണം | ಸಂಭಾಷಣೆ | Conversation |
| सन्तः | सज्जनाः | സജ്ജനങ്ങൾ | ಸಜ್ಜನರು | Gentlemen |
| समीक्ष्य | सन्दृश्य | കണ്ടിട്ട് | ನೋಡಿ | Having seen |
| सहसा | झटिति | പെട്ടെന്ന് | ಬೇಗನೆ | Suddenly |
| ह्री | लज्जा | ലജ്ജ | ಲಜ್ಜೆ | Shame |

## किमधिगतम्

| पठनप्रवर्तनानि | स्वांशीकृतम् | भागिकतया स्वांशीकृतम् | प्रगतये प्रयत्नः विधेयः |
|---|---|---|---|
| श्लोकं सतालम् आलपति । | | | |
| श्लोकस्य अन्वयम्, आशयं च लिखति । | | | |
| आस्वादनटिप्पणीं रचयति । | | | |
| सुभाषितसम्पुटं निर्माति । | | | |
| सन्दर्भानुसारं सम्भाषणां रचयति । | | | |
| वाक्यं मध्यमपुरुषरूपे लिखति । | | | |
| ध्येयवाक्यानां पट्टिकां लिखति । | | | |
| लघूपन्यासं लिखति । | | | |
| वेदवेदाङ्गोपनिषदां पट्टिकां लिखति । | | | |

# अक्षरमाला

## स्वराक्षराणि

| | | | | |
|---|---|---|---|---|
| अ | आ | इ | ई | उ |
| ऊ | ऋ | ॠ | ॡ | ए |
| ऐ | ओ | औ | अं | अः |

## व्यञ्जनाक्षराणि

| | खरः | अतिखरः | मृदुः | घोषः | अनुनासिकः |
|---|---|---|---|---|---|
| कवर्गः | क | ख | ग | घ | ङ |
| चवर्गः | च | छ | ज | झ | ञ |
| टवर्गः | ट | ठ | ड | ढ | ण |
| तवर्गः | त | थ | द | ध | न |
| पवर्गः | प | फ | ब | भ | म |

| अन्तःस्थाः/मध्यमाः | | | |
|---|---|---|---|
| य | र | ल | व |

| ऊष्माणः | | | |
|---|---|---|---|
| श | ष | स | ह |

# ഭാരതത്തിന്റെ ഭരണഘടന

ഭാഗം IV ക

## മൗലിക കർത്തവ്യങ്ങൾ

**51 ക. മൗലിക കർത്തവ്യങ്ങൾ - താഴെപ്പറയുന്നവ ഭാരതത്തിലെ ഓരോ പൗരന്റെയും കർത്തവ്യം ആയിരിക്കുന്നതാണ് :**

(ക) ഭരണഘടനയെ അനുസരിക്കുകയും അതിന്റെ ആദർശങ്ങളെയും സ്ഥാപനങ്ങളെയും ദേശീയപതാകയെയും ദേശീയഗാനത്തെയും ആദരിക്കുകയും ചെയ്യുക;

(ഖ) സ്വാതന്ത്ര്യത്തിനുവേണ്ടിയുള്ള നമ്മുടെ ദേശീയസമരത്തിന് പ്രചോദനം നൽകിയ മഹനീയാദർശങ്ങളെ പരിപോഷിപ്പിക്കുകയും പിൻതുടരുകയും ചെയ്യുക;

(ഗ) ഭാരതത്തിന്റെ പരമാധികാരവും ഐക്യവും അഖണ്ഡതയും നിലനിർത്തുകയും സംരക്ഷിക്കുകയും ചെയ്യുക;

(ഘ) രാജ്യത്തെ കാത്തുസൂക്ഷിക്കുകയും ദേശീയസേവനം അനുഷ്ഠിക്കുവാൻ ആവശ്യപ്പെടുമ്പോൾ അനുഷ്ഠിക്കുകയും ചെയ്യുക;

(ങ) മതപരവും ഭാഷാപരവും പ്രാദേശികവും വിഭാഗീയവുമായ വൈവിധ്യങ്ങൾക്കതീതമായി ഭാരതത്തിലെ എല്ലാ ജനങ്ങൾക്കുമിടയിൽ, സൗഹാർദവും പൊതുവായ സാഹോദര്യമനോഭാവവും പുലർത്തുക. സ്ത്രീകളുടെ അന്തസ്സിന് കുറവു വരുത്തുന്ന ആചാരങ്ങൾ പരിത്യജിക്കുക;

(ച) നമ്മുടെ സമ്മിശ്രസംസ്കാരത്തിന്റെ സമ്പന്നമായ പാരമ്പര്യത്തെ വിലമതിക്കുകയും നിലനിറുത്തുകയും ചെയ്യുക;

(ഛ) വനങ്ങളും തടാകങ്ങളും നദികളും വന്യജീവികളും ഉൾപ്പെടുന്ന പ്രകൃത്യാ ഉള്ള പരിസ്ഥിതി സംരക്ഷിക്കുകയും അഭിവൃദ്ധിപ്പെടുത്തുകയും ജീവികളോട് കാരുണ്യം കാണിക്കുകയും ചെയ്യുക;

(ജ) ശാസ്ത്രീയമായ കാഴ്ചപ്പാടും മാനവികതയും, അന്വേഷണത്തിനും പരിഷ്കരണത്തിനും ഉള്ള മനോഭാവവും വികസിപ്പിക്കുക;

(ഝ) പൊതുസ്വത്ത് പരിരക്ഷിക്കുകയും ശപഥം ചെയ്ത് അക്രമം ഉപേക്ഷിക്കുകയും ചെയ്യുക;

(ഞ) രാഷ്ട്രം യത്നത്തിന്റെയും ലക്ഷ്യപ്രാപ്തിയുടെയും ഉന്നതതലങ്ങളിലേക്ക് നിരന്തരം ഉയരത്തക്കവണ്ണം വ്യക്തിപരവും കൂട്ടായതുമായ പ്രവർത്തനത്തിന്റെ എല്ലാ മണ്ഡലങ്ങളിലും ഉൽക്കൃഷ്ടതയ്ക്കുവേണ്ടി അധ്വാനിക്കുക;

(ട) ആറിനും പതിനാലിനും ഇടയ്ക്ക് പ്രായമുള്ള തന്റെ കുട്ടിക്കോ തന്റെ സംരക്ഷണയിലുള്ള കുട്ടികൾക്കോ, അതതു സംഗതി പോലെ, മാതാപിതാക്കളോ രക്ഷാകർത്താവോ വിദ്യാഭ്യാസത്തിനുള്ള അവസരങ്ങൾ ഏർപ്പെടുത്തുക.

# കുട്ടികളുടെ അവകാശങ്ങൾ

പ്രിയമുള്ള കുട്ടികളേ,

നിങ്ങൾക്കുള്ള അവകാശങ്ങളെന്തെല്ലാമെന്ന് അറിയേണ്ടതില്ലേ? അവകാശങ്ങളെക്കുറിച്ചുള്ള അറിവ് നിങ്ങളുടെ പങ്കാളിത്തം, സംരക്ഷണം, സാമൂഹികനീതി എന്നിവ ഉറപ്പാക്കാൻ പ്രേരണയും പ്രചോദനവും നൽകും. നിങ്ങളുടെ അവകാശങ്ങൾ സംരക്ഷിക്കാൻ ഇപ്പോൾ ഒരു കമ്മീഷൻ പ്രവർത്തിക്കുന്നുണ്ട്. കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ എന്നാണ് അതിന്റെ പേര്. എന്തെല്ലാമാണ് നിങ്ങൾക്കുള്ള അവകാശങ്ങൾ എന്നു നോക്കാം.

- സംസാരത്തിനും ആശയപ്രകടനത്തിനുമുള്ള സ്വാതന്ത്ര്യം
- ജീവന്റെയും വ്യക്തിസ്വാതന്ത്ര്യത്തിന്റെയും സംരക്ഷണം
- അതിജീവനത്തിനും പൂർണ്ണവികാസത്തിനുമുള്ള അവകാശം
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി ബഹുമാനിക്കപ്പെടാനും അംഗീകരിക്കപ്പെടാനുമുള്ള അവകാശം
- മാനസികവും ശാരീരികവും ലൈംഗികവുമായ പീഡനങ്ങളിൽ നിന്നുള്ള സംരക്ഷണത്തിനും പരിചരണത്തിനുമുള്ള അവകാശം
- പങ്കാളിത്തത്തിനുള്ള അവകാശം
- ബാലവേലയിൽനിന്നും ആപൽക്കരമായ ജോലികളിൽനിന്നുമുള്ള മോചനം
- ശൈശവവിവാഹത്തിൽനിന്നുള്ള സംരക്ഷണം
- സ്വന്തം സംസ്കാരം അറിയുന്നതിനും അതനുസരിച്ച് ജീവിക്കുന്നതിനുമുള്ള സ്വാതന്ത്ര്യം
- അവഗണനകളിൽനിന്നുള്ള സംരക്ഷണം
- സൗജന്യവും നിർബന്ധിതവുമായ വിദ്യാഭ്യാസ അവകാശം
- കളിക്കാനും പഠിക്കാനുമുള്ള അവകാശം
- സ്നേഹവും സുരക്ഷയും നൽകുന്ന കുടുംബവും സമൂഹവും ലഭ്യമാകാനുള്ള അവകാശം

## നിങ്ങളുടെ ചില ഉത്തരവാദിത്വങ്ങൾ

- സ്കൂൾ, പൊതുസംവിധാനങ്ങൾ എന്നിവ നശിപ്പിക്കാതെ സംരക്ഷിക്കുക.
- സ്കൂളിലും പഠനപ്രവർത്തനങ്ങളിലും കൃത്യനിഷ്ഠ പാലിക്കുക.
- സ്കൂൾ അധികാരികളെയും അധ്യാപകരെയും മാതാപിതാക്കളെയും സഹപാഠികളെയും ബഹുമാനിക്കുകയും അംഗീകരിക്കുകയും ചെയ്യുക.
- ജാതി-മത-വർഗ-വർണ്ണ ചിന്തകൾക്കതീതമായി മറ്റുള്ളവരെ ബഹുമാനിക്കാനും അംഗീകരിക്കാനും സന്നദ്ധരാവുക.


*ബന്ധപ്പെടേണ്ട വിലാസം:*

**കേരള സംസ്ഥാന ബാലാവകാശസംരക്ഷണ കമ്മീഷൻ**

ശ്രീ ഗണേഷ്, റ്റി.സി. 14/2036, വാൻറോസ് ജംങ്ഷൻ,
കേരള യൂണിവേഴ്സിറ്റി പി.ഒ, തിരുവനന്തപുരം – 34
ഫോൺ 0471 – 2326603
ഇ- മെയിൽ childrights.cpcr@kerala.gov.in, rte.cpcr@kerala.gov.in
വെബ്സൈറ്റ് : www.kescpcr.kerala.gov.in


ചൈൽഡ് ഹെൽപ്പ് ലൈൻ - 1098, ക്രൈം സ്റ്റോപ്പർ - 1090, നിർഭയ – 1800 425 1400
കേരള പൊലീസ് ഹെൽപ്പ് ലൈൻ - 0471 – 3243000/44000/45000

*online **R.T.E Monitoring : www.nireekshana.org.in***